शारदा - गौरव - ग्रन्थमाला - पुण्यपत्तनम् २

॥ श्रीः ॥

शारदोपासकेभ्यः नमो नमः ।

स्वर्गीय श्री. बाळकृष्ण सदाशिव जोशी

— इत्येतैः मूलतः विरचितस्य तथैव

पं. विनायकशास्त्री पराञ्जपे
पं. वसन्त अनन्त गाडगीळ

— इति पण्डितद्वयेन संपादितस्य

' मराठी-संस्कृत-शब्दकोष '

— इति ग्रन्थरत्नस्य

तथा प्रा. रं. रा. देशपाण्डे (रुईया महाविद्यालय मुम्बापुरी)
इत्येतैः संस्कृतस्य

' मा ना प मा न '

(मूललेखकः स्व. कृष्णाजी प्रभाकर खाडिलकर)

इति नाट्यरत्नस्य प्रकाशनसमारोहः सुनिश्चितः ।

समयः — अक्षय्यतृतीया १८९१ – दि. १९ एप्रिल १९६९
शनिवासरे सायं ६ वादनसमये

स्थलम् — सुभाष-सभागृहम् , शिवशक्ति 'मराठा'
वरळी — मुम्बापुरी १८

पुणें-विद्यापीठ-कुलगुरूणां डॉ. हरिभाऊ पाटसकर
महोदयानां साभापत्येन म. म. प्रा. दत्तो वामन पोतदार, आचार्य
प्रल्हाद केशव अत्रे, पद्मपण्डितः श्री. पां वा. गाडगीळ इत्येतेषां शुभा-
शंसन-भाषणैः भूषितस्य अस्य समारोहस्य साफल्यार्थं श्रीमतां सर्वेषाम्
उपस्थितिः साग्रहं प्रार्थ्यते ।

विनीताः

'शारदा'
पुण्यपत्तनम् २

श्री. सीताराम बाळकृष्ण जोशी
डॉ. लक्ष्मण बाळकृष्ण जोशी
पं. वसन्त . अनन्त गाडगीळ

शारदा

वैशाख १८९१
एप्रिल १९६९

मराठी-संस्कृत-कोषकर्ता स्वर्गीयः पिलोबा जोशी

डॉ. लक्ष्मण बाळकृष्ण जोशी । महाराष्ट्रख्यातः शल्यकर्म-विशारदः (सर्जन)। शारदाकारेषु तस्य पितृसहजं वात्सल्यम् । तस्य स्वर्गतः पिता श्री. बाळकृष्ण सदाशिव जोशी (तथा पिलोबा जोशी) महोदयः । अयं पुरुषश्रेष्ठः क्रान्तदर्शी । दीर्घोद्यमः । संस्कृतप्रियः । द्वारका नाम्नी तस्य कन्यका । अस्याः संस्कृताध्यापनसमये श्री. पिलोबा जोशी महोदयैः निर्णीतं मराठी-संस्कृत-शब्दकोषः सज्जीकर्तव्यः इति । तथा तैः प्रयतितम् । विरचितः शब्दकोषः । परं करालः कालः कार्यघातकः समुपस्थितः । १० मे १९५८ (अक्षय्यतृतीया) तस्य संस्कृतसेवकस्य स्वर्गमनकालः ।

पितृश्राद्धम् । कर्तव्यं पुत्रस्य । तत् श्राद्धं भोजनदानेन भवति । विदुषां पूजनेन क्रियते । पुण्यस्मरणेन संपन्नं भवति । परं प्रियपुत्रेण डॉ. जोशी लक्ष्मणेन निर्णीतम् । 'शब्दकोषप्रकाशनेन श्राद्धं सुसंपन्नं भवतु ' इति ।

सत्यसंकल्पस्य सिद्धिदः भगवान् परमेशः । तस्य कृपया इदं कोषप्रकाशनम् अधुना संपन्नं भवति । तृप्ताः सन्तु स्व. पिलोबा जोशी महोदयाः । चिरं जीवतु पितृवत्सलः डॉ. जोशी लक्ष्मण (नाना) रायः ।

अनेन कोषप्रकाशनेन 'शारदा' जीवने नूतनं कोषयुगं प्रारब्धम् । अभूतपर्वः मराठी-संस्कृतकोषः संप्रति प्रकाशितः । इतःपरम् इत्थम् एव फारसी - कोङ्कणी - गुजराती - कर्णाटकी - प्रभृति - प्रादेशिक-भाषातः संस्कृत-शब्दकोषं प्रकाशं नेतुम् इच्छन्ति 'शारदा' काराः । डॉ. जोशी लक्ष्मणरायः तत्र प्रेरकः । सश्रद्धं साहाय्यकः । स्वर्गतः तत् पिता श्री. जोशी पिलोबा (तात्या) रायः मार्गदर्शकः । तस्य पुण्यात्मनः कृपाप्रसादेन इयं 'शारदा-गौरव-ग्रन्थमाला कोषपुष्पमण्डिता भविष्यति' इति विश्वासः । जनताजनार्दनः तत्र स्निग्धः भवतु इति प्रार्थना ।

सश्रद्धं नमो नमः शब्दकोषमूलप्रवर्तकाय स्व. पिलोबा जोशी-महोदयाय ।

* * *

पुणें) महाराष्ट्रराज्यशासन-भारतकेन्द्रशासन-पुरस्कृता विश्वप्रिया (मुम्बई
शृङ्गेरी-शारदापीठ-श्री-शंकराचार्यैः संस्कृत-'शंकरकृपा'-त्वेन स्वीकृता

सौर १६ वैशाख १८९१

शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् १० अङ्कौ ११-१२

वार्षिकमूल्यम् रू. ८ * अस्य अङ्कस्य रू. ०-८०

शान्तिः ।

शं ते सूर्य आ तपतु शं वातो वातु ते हृदे ।
शिवा अभि क्षरन्तु त्वापो दिव्याः पयस्वतीः ॥

अथर्ववेद ८. २. १४.

(सूर्यः ते शम् आ तपतु) सुर्य तेरे लिये शान्तिपूर्वक तपे । (वातः ते हृदे शम् वातु) वायु तेरे हृदय के लिये शान्तिपूर्वक प्रवाहित हो । (दिव्याः पयस्वतीः आपः) दिव्य जलमयी धारायें (त्वा) तेरे प्रति (अभि) सब ओर से (शिवाः) शिवतायें (क्षरन्तु) क्षरण करें ।

— विद्यानन्द 'विदेह'

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥

चतुर्मुखस्य ब्रह्मणः मुखान्येव अम्भोजवनानि (पद्मवृन्दानि) तेषु हंसवधूः (हंसीस्वरूपा) सर्वतः (सर्वावयवेन सर्वप्रकारेण च) शुक्ला (श्वेतवर्णा परिशुद्धा च) सरस्वती (वागधिष्ठात्री देवी) नित्यं (सततं) मम मानसे (चेतसि तदाख्यसरसि च) रमतां (विहरतु) मानसे सरसि पद्मवनेषु हंसीव या ब्रह्मणो मुखकमलेषु श्रुतिरूपेण सततं विरहति सा सर्वशुद्धा वाग्देवी मम हृदये सततं वसतु इति निष्कर्षः । नित्यमित्यत्र दीर्घमिति पाठे दीर्घं सुचिरमित्यर्थः ॥ (काव्यादर्शः)

महाजनो येन गतः स पन्थाः ।

प्रणम्य देवं सदनाय गन्तुम्
जाता मतिः ध्वान्तमयी निशाऽऽसीत् ।
मार्गं न पश्यामथ कोऽस्त्युपायः
महाजनो येन गतः स पन्थाः ॥ १

शालान्तविद्या पठिता सुतेन
का तस्य देया फलदा प्रशिक्षा ।
स वास्तुविद्वान् भविता भिषग् वा
महाजनो येन गतः स पन्थाः ॥ २

अधीतविद्या तनया वयःस्था
कस्मै प्रदेयेति महान् वितर्कः ।
सनिश्चयं वेतनिने प्रदेया
महाजनो येन गतः स पन्थाः ॥ ३

दुर्मार्ग-वाणिज्य-धनं प्रभूतम्
स्फुटं न सर्वैरिह तन्न भोज्यम् ।
सुवर्णरूपेण बिले निधेयम्
महाजनो येन गतः स पन्थाः ॥ ४

सर्वे दोषाः सर्वकारं श्रयन्ते ।

दुष्टो वातः दुर्जया रोगराजिः ।
क्षीणा वृष्टिः वन्ध्यसस्या कृषिश्च ॥
गत्वा मूल्यान्यूर्ध्वमभ्रं कषन्ति ।
सर्वे दोषाः सर्वकारं श्रयन्ते ॥ १

मार्गभ्रंशश्छात्रवर्गस्य यूनः ।
पार्श्वे शत्रुर्मित्रवद्वर्धमानः ॥
युक्ताः शास्तुं स्फारमुत्कोचवन्तः ।
सर्वे दोषाः सर्वकारं श्रयन्ते ॥ २

सन्ताननियन्त्रणम् ।

कुटुम्बवृद्धिं विनियन्तुकामाः
सेवानियुक्ता अपि बालकेषु ।
विज्ञानवाचो विकिरन्ति शून्याः
प्रचारमत्तेषु कुतो विवेकः ॥

बळगांव — श्री. श्यामसुंदर पुणेकर

तुका म्हणे ६ तुका वक्ति

नीचपण बरवे देवा ।
न चले कोणाचाही हेवा ।
महापुरे झाडे जाती ।
तेथे लवाळे वाचती ।।
येता सिंधूच्या लहरी ।
नम्र होता जाती त्वरी ।।
तुका म्हणे कळ ।
पाय धरल्या न चळे बळ ।।

— तुकाराम

क्षुद्रत्वं रोचये देव ।
अप्रसारितमत्सरम् ।
ओघभग्नेषु वृक्षेषु ।
सुखं तिष्ठति वेतसः ।।
अवाङ्मुखं अहिंसत्यः ।
पुरो यान्ति महोर्मयः ।।
बलाधानं तुका वक्ति ।
कुरुते पादपीडनम् ।।

— डॉ. ग. बा. पळसुले

बाबा-ताहेर-काव्यम् . . . ६

अगर मस्तानू मस्तेमज् त ऐमूँ
वगर् बे पाव दस्तेमज् त ऐमूँ ।।
अगर गोरेमू[१] व तरसा[२] अर् मुसल्मूँ[३]
वहर् मिल्लत् कें हस्तेमज् त ऐमूँ ।।

सदा माध्वीमत्तो युवतिनिरतोऽहं यदि, विभो ।
तवैवाहं दीनः करचरणहीनोऽपि हि, तव ।।
यहूदी खरैस्तो वा बत मुसलमान् वा प्रिय ! सखे ।
भवेयं यः को वा जगति तु तवैवास्म्यनुचरः ।।७।।

१८-६-३१० गोळीपुरा
गोळा रामय्या वाडा हैद्राबाद २

न्या. गुण्डेराव हरकारे
निवृत्तः सत्रन्यायाध्यक्षः

१ गोरेमू-यहुदी २ तरसा-खरैस्तः ३ मुसलमूँ-मुसलमान्

डॉ. व्यं. वि. द्रविड – शुभाशंसनम्



व्यं. वि. द्रवीड

करवीरस्थाः शारदामित्रोत्तमाः प्रा. व्यं. वि. द्रविड महोदयाः अचिरादेव पुणें-विद्यापीठद्वारा डॉक्टरोपाधि-प्रदानेन समलङ्कारिताः। तदर्थम् अभिनन्दनीयाः ते।

— संपादकः

धन्यस्त्वं द्रविड, त्वदीयधिषणोत्कर्षस्वरूपा शुभा ।
वार्ता श्रोत्रपथं गता सुमधुरा "त्वं डॉक्टरोऽभू" रिति ॥
भूयात् ते हि सुजीवन सुखकरं, सत्यं शिवं, सुन्दरम्, ।
नित्यं चास्तु यशः सुधांशुसदृशं वाञ्छावयोरुत्कटा ॥

— स्नेहभाजनम्
पं. वसन्त अ. गाडगीळ
पं. कवीश्वरः श्रीपादशर्मा

१८९०) महाराष्ट्र-संस्कृत-परिषद् (१९६९

पञ्चमाधिवेशने परिताः प्रस्तावाः।

१) चतुर्थक-गोमान्तकाधिवेशनाद् आरभ्य महाराष्ट्र-संस्कृत-परिषदध्यक्षाः म. म. पं. हरदास बाळशास्त्रिणः गतवर्षे श्रावणमासे हृदयविकारेण स्वर्गताः। 'शतध्वनी' इति सम्यग् वर्णितानां संस्कृतविरोधकनिःपातकर्तॄणां तेषां महानिर्याणेन संस्कृतविश्वस्य, सांस्कृतिकस्य जगतः भारतवर्षस्य या अपूरणी क्षतिः संजाता तदर्थं परिषदधिवेशनम् इदं शोकं प्रकटीकरोति प्रार्थयते च भगवन्तं तेषां सद्गतिम्।

डॉ. श्री. भा. वर्णेकर (अध्यक्षः) नागपुरम्

२) संस्कृताध्यापकानां नितरां दुर्लभता सांप्रतं सर्वत्र एव वरीवर्ति। माध्यमिकपाठशालासु अगत्या यः कः अपि संस्कृतविषयम् अध्यापयितुम् अनिच्छन् अनर्हः अपि नियोक्तव्य इति आपद्यते। तेन समुत्सुकाः कुशलाग्रगतयोऽपि छात्राः विरसा उदासीना वा भवन्ति। किमुत इतरे छात्राः। परिणामतः संस्कृताध्ययनम् सर्वथा निष्फलं भवति। तामिमां संस्कृताध्यापकदुर्लभतां दूरीकर्तुं वासन्तिकविरामावसरे तत्र तत्र संस्कृताध्यापकवर्गाः प्रचालनीयाः। तदर्थं शासनेन समुचिता योजना विधेया अथवा संस्कृतविषये कार्यपराणां संस्थानां द्वारा समस्या इयं निवारणीया येन माध्यमिकशालासु संस्कृताध्ययने छात्राः उत्साहं लभेरन् संस्कृतं अधीत्य च ज्ञानं, सुसंस्कारम्, आनन्दम् विन्देरन्।

प्रस्तावकः — **पं. धूपकर शिवरामशास्त्री**, पुण्यपत्तनम्
समर्थकः — **पं. गणेशशास्त्री जोशी**, मुम्बापुरी

३) प्राथमिकाध्यापकशिक्षाभ्यासक्रमे (प्रायमरी ट्रेनिङ्ग) माध्यमिकशिक्षाध्यापकशिक्षाभ्यासक्रमे (सेकण्डरी ट्रेनिङ्ग) तथा च टी. डी. शिक्षकछात्राणां कृते संस्कृताध्ययनं परीक्षाक्रमे संनिवेशनीयम्। येन तस्मिन् तस्मिन् शिक्षाविभागे सर्वेऽपि शिक्षकाः संस्कृतेन परिचिताः सुसंस्कृताश्च स्युः तेषां च तत्संस्कृतज्ञानं, सुसंस्काराश्च अनायासेन एव छात्रेषु संक्रान्ताः भवेयुः।

प्रस्तावकः — **पं. दुर्गाराम उपाध्ये**, गोमन्तकः
समर्थकः — **डॉ. रा. ल. जोशी**, षोडशपुरम्

४) आन्ध्र-केरलादिषु प्रदेशेषु संस्कृतप्रधानः माध्यमिकाभ्यासक्रमः तदनुसारं नैके माध्यमिकविद्यालयाश्च संचालनीयाः । यत्र माध्यमिकविद्यालये प्राचीनाम् अमरकोश-अष्टाध्यायीमुखाम् तथैव नूतनां क्रमानुसारिणीं चापि प्रणालीमनुसृत्य संस्कृतम् अन्ये च आवश्यकाः विषयाः अन्य-माध्यमिकमहाविद्यालयीन-समानाः अध्यापिताः स्युः ।

प्रस्तावकः – पं. शिवरामशास्त्री धूपकर, पुण्यपत्तनम्
समर्थकौ – प्रा. दि. वि. वऱ्हाडपांडे, नागपुरम्
डॉ. श्री. भा. वर्णेकर, नागपुरम्

५) सर्वेषु आबालवृद्धनागरिकेषु संस्कृताभ्यासे उत्साहं जनयितुं वर्धयितुं च बहिःशालाः नाटचदर्शन - वाचन - वक्तृत्व - गानादिरूपाः विविधाः स्पर्धाः अन्ये च उपायाः प्राचीनपाठशालाद्वारा आयोजनीयाः । तदर्थं च शासनेन समुचितं साहाय्यं विधेयम् । शासनसंचालित-नाटचस्पर्धायां सर्वाः पाठशालाः सहभागिन्यः भवन्तु ।

प्रस्तावकः – पं. वसन्त अ. गाडगीळ, पुण्यपत्तनम्
समर्थकः – पं. दुर्गाराम उपाध्ये, गोमन्तक

६) यथा इतरविद्यापीठेषु संस्कृत-पाली-अर्धमागधी-पर्शियन-प्राच्यभाषाणां परीक्षाः सन्ति तथैव शिवाजी-मराठवाडा-एस्. एन्. डी. टी-पुण्यपत्तन विद्यापीठ-मुंबई विद्यापीठम् एतेषु विद्यापीठेषु प्राच्यभाषा परीक्षाः संचालिताः सन्तु ।

प्रस्तावकः – पं. ना. वा. तुंगार, पुण्यपत्तनम्
समर्थिका – सौ. कमल श्री. वर्णेकर, नागपुरम्

७) यथा उत्तरप्रदेश-बिहार-बंगाल-राजस्थान-मद्रास-मैसूर-मध्यप्रदेशादिषु प्रान्तेषु स्वातन्त्र्येण संस्कृतमहाविद्यालयाः शासकीयाः वर्तन्ते तथैव महाराष्ट्रेषु राजकीय-संस्कृत-महाविद्यालयः भवतु ।

प्रस्तावकः – पं. ना. वा. तुंगार, पुण्यसत्तनम्
समर्थकौ – सौ. मालती चक्रदेव, मुम्बापुरी
पं. श्री. भा. वर्णेकर, नागपुरम्

८) कारागृहे नीतिपाठकपदे संस्कृतपण्डितानां नियुक्तिर्भवतु ।

प्रस्तावकः – पं. ना. वा. तुंगार, पुण्यपत्तनम्
समर्थकः – पं. वसन्त अ. गाडगीळ, पुण्यपत्तनम्

९) स्वातन्त्र्यप्राप्तेरनन्तरं संस्कृतपाठशालानां संख्या प्रतिवर्षं ह्रसते इति ज्ञायते। माध्यमिकशालासु संस्कृतभाषाध्ययनं कर्तुं छात्राणामध्ययने साहाय्यं कर्तुं संस्कृतपाठशालाः स्थापयितुम् उत्तेजनं दातव्यम्। पाठशालासु अध्यापकग्रन्थालयादिविषये अनुदानादिनियमः माध्यमिकशालानुसारेण एव सन्तु इति शासनं प्रार्थ्यते।

प्रस्तावकः – पं. शि. ह. धूपकर, पुण्यपत्तनम्
समर्थकः – दि. वि. ऱ्हाडपांडे, नागपुरम्

१०) कस्मिश्चित् अपि बहुभाषि राष्ट्रे सर्वासु भाषासु या उच्चतमा भाषा सा एव राष्ट्रभाषा। भारते राष्ट्रे संस्कृतभाषा-एव उच्चतमा इति विषये न स्वल्पोऽपि संदेहः। अतः भारतस्य राष्ट्रभाषा संस्कृतमेव न अन्या काऽपि। किन्तु अस्माकं संविधानेन राष्ट्रभाषा स्थानं न निर्मितम् तत् न समीचीनम्। तस्मात् महाराष्ट्र-संस्कृत-परिषद् इयं लोकसभां प्रार्थयते यत् संविधानस्य ३४३ तमे परिच्छेदे अधोनिर्दिष्टम् एकं वाक्यं समावेष्टव्यम्। "भारतस्य राष्ट्रभाषा अनादिकालात् संस्कृतमेव अस्ति सा तथैव अत्र उद्घोषितास्ति।

प्रस्तावकः – श्री. ल. म. चक्रदेव, मुम्बापुरी
समर्थकः – श्री. शं. दा. पेशवे, षोडशपुरम्

११) महाराष्ट्रराज्यस्य भारतवर्षे महत्त्वपूर्णं भौगोलिकं स्थानम् संस्कृतविद्याप्रवीणताविषयकं च पूर्वेतिहासं समीक्ष्य महाराष्ट्रशासनं स्थापयतु संस्कृतविद्यापीठं सत्वरातिसत्वरं महाराष्ट्रराज्ये।

प्रस्तावकः – पं. वसन्त अ. गाडगीळ, पुण्यपत्तनम्
समर्थकौ – श्री. शं. दा. पेशवे, षोडशपुरम्
डॉ. श्री. भा. वर्णेकर, नागपुरम्

१२) कोटिद्वयरूप्यकव्ययेन दिल्लीनगरे भारतशासनं 'संस्कृतभवनं' प्रस्थापयतु।

प्रस्तावकः – पं. वसन्त अ. गाडगीळ, पुण्यपत्तनम्
समर्थकः – पं. दुर्गाराम बा. उपाध्ये, गोमन्तकः

स्मर्यताम्! स्मर्यताम्! स्मर्यताम्!

शारदा-मुद्रण-सिद्धि-मन्दिरम्, पुण्यपत्तनम् २

महाराष्ट्र-संस्कृत-परिषद्

पञ्चमाधिवेशनम् प्रज्ञापुरम्

अक्कलकोट (सोलापूर)

(दि. १ मार्च, २ मार्च १९६९)

अध्यक्षीय–भाषणम्



अध्यक्षः डॉ. श्री. भा. वर्णकर, डी.लिट्.

प्रकाशकः

प्रधानमन्त्री, महाराष्ट्र-संस्कृत-परिषद्, ४२५ सदाशिव, पुण्यपत्तनम् २

शारदा–गौरव–ग्रन्थमाला

पुष्पम्	लेखकः	मूल्यम्
१. श्रीराजेन्द्रप्रसादचरितम्	पं. वासुदेवशास्त्री लाटकर	३.००
२. वात्सल्यरसायनम्	प्रा. श्री. भा. वर्णेकर	१.००
३. शिक्षैषा सात्त्विकी सताम्	प्रा. रं. रा. देशपाण्डे	२.००
४. श्रीरामकृष्णपरमहंसीयम्	प्रा. श्री. भा. वर्णेकर	१.२५
५. बालकानां जवाहरः	पं. विघ्नहरि देव	०.४०
६. श्रीमान् विन्स्टनः चर्चिलः	पं. औदुम्बरकर शास्त्री	०.६४
७. अप्पाशास्त्रीः साहित्यसमीक्षा	प्रा. अशोक अकलूजकर	२.००
८. श्रीशिवराज्योदयम् खण्डः १	डॉ. श्री. भा. वर्णेकर	८.००
९. 'समानमस्तु वो मनः'	डॉ. ग. बा. पळसुले	३.००
१०. मराठी–संस्कृत-शब्दकोषः	जोशी-परांजपे-गाडगीळ	(क्रमशः)
११. भूपो भिषक्त्वं गतः।	पं. ग. पां. लोण्ढेशास्त्री	१.००
१२. विनायक-वीर-गाथा	डॉ. ग. बा. पळसुले	३.००
१३. आङ्ग्ललघुकाव्यानुवादमाला	पं. ल. ज. खरे	२.००
१४. श्रीराजयोगभाष्यम्	डॉ. चिं. त्र्यं. केङ्घे	५.००
१५. मुक्तक-मञ्जूषा	दि. द. बहुलीकर	२.००
१६. ललित-गीता-लहरी	पं. ओगेटि परीक्षित्शर्मा	१.५०
१७. श्रीसिद्ध-रामनाथ-कथा	योगी नरहरिनाथः	३.००
१८. जैत्र यात्रा विलाससारः	श्रीभाष्यस्वामी	१.००

पत्रव्यवहारस्थानम्

'शारदा' – कार्यालयः पुण्यपत्तनम् २

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ

मुद्रणस्थलम्– यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २.

प्रकाशनस्थलम्-१.- म.म. प्रा.द.वा.पोतदार, ४९८ शनिवार, पुण्यपत्तनम् २

२.–श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४

कार्यालयः— खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् २.

महाराष्ट्र-संस्कृत-परिषदः पञ्चमे अधिवेशने अध्यक्षीयं भाषणम्

डॉ. श्रीधर भास्कर वर्णेकर, डी. लिट्.
व्याख्याता, नागपुर-विश्वविद्यालयः

पूजनीयचरणाः श्रीमदक्कलकोट-क्षेत्राधिपति - श्री. गजाननमहाराजाः स्वागतसमित्यध्यक्षाः, श्री. बाबूराव-पारखे-महोदयाः, तथा अत्र उपस्थिताः सर्वे संस्कृतानुरागिणः सभ्याश्च !

महत् खलु इदं प्रमोदस्थानं यद् अस्मिन् साक्षात्कृतब्रह्मात्मैक्यानां साधुवरेण्यानां प. पू. श्रीसमर्थसद्गुरुमहाराजप्रभृतीनां निरन्तरनिवासेन, तथा च "मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद" इति भगवद्वचनानुसारं साक्षात्परमेश्वरनिवासोचितेऽस्मिन् महाराष्ट्र-मण्डल-सुविख्याते अक्कलकोटग्रामे महाराष्ट्र-संस्कृत-परिषदः पञ्चमम् अधिवेशनं सम्मिलतीति । तत्रापि च क्षेत्राधिपतीनां प. पू. परमसद्गुरु-श्रीगजाननमहाराजस्वामिचरणानां पवित्रप्रेरणाम् आदृत्य समायोजितस्य यागस्य अङ्गभूतत्वेन अधिवेशनमिदं समायोजयद्भिर्महानुभावैः "योजकस्तत्र दुर्लभः" इतीदं त्रिकालाबाधितं सुभाषितं चरितार्थतां नीतम् इति बाढं मन्ये । तर्कयामि च कस्यापि प्राक्तनस्य सुकर्मणः परिपाकः साम्प्रतं मत्कृते फलेग्रहिः सञ्जात इति । अन्यथा कथमेतादृशे पुण्यावसरे संस्कृतसम्मेलनाध्यक्षत्वेन सुदूरस्थितस्य विशेषतश्च स्पृहणीयगुणविकलस्य मादृशः पामरस्यात्राभ्यागमः ।

उपनिषत्सु यज्ञविरोधः

भगवता जगदेकगुरुणा श्रीकृष्णस्वरूपेण परमात्मना, पार्थं निमित्तीकृत्य निखिलमानवकल्याणार्थं धर्मक्षेत्रे कुरुक्षेत्रे संप्रोक्ते गीताभिधाने योगशास्त्रे यद्यपि कर्म-भक्ति-ज्ञान-प्रमुखस्य योगशास्त्रस्य सकलविद्वृन्दहृदयावर्जकं प्रतिपादनं प्रसादमधुरया वाचा कृतं, तथापि गीतास्वरूपस्य योगशास्त्रस्य इयं खल्वपूर्वता यत् तत्र योगप्रतिपादनपरायणतया यागस्य न कृता तिरस्कृतिः उपेक्षा वा । प्रायेण बहुषु शास्त्रीयेषु ग्रन्थेषु विधेयं स्तोतुं प्रवृत्ताः शास्त्रकर्तारः अनिन्द्यमपि निन्दितुं प्रगल्भन्ते ।

साक्षाद् भगवता ज्ञानेश्वरेण स्वीये विश्वसाहित्यललामभूते ग्रन्थे गीतास्तवनोत्सुकमनस्कतया—

वेद संपन्न होये ठायी । परि कृपण ऐसा आन नाही ।।

इत्यस्मिन् पद्ये सर्वथाऽनवद्येषु वेदेषु कार्पण्यम् आरोपितम् । कठोपनिषदि वा ज्ञानयोगश्रेष्ठत्वप्रतिपादनपरायणेन मन्त्रदृशा परमर्षिणा

" प्लवा ह्येते अदृढा यज्ञरूपाः
अष्टादशोक्तमवरं येषु कर्म ।। "

इत्यस्मिन् मन्त्रे, वेदप्रवर्तितानां यज्ञानां अदृढैः प्लवैः साकं तुल्यत्वं निवेद्य आत्मोद्धारकार्ये तेषां नैरर्थ्यं खलु संसूचितम् । एवमेव अन्यत्र उपनिषद्ग्रन्थेषु यत्र तत्र ज्ञान-ध्यान-योगमाहात्म्यप्रतिपादनावसरे यज्ञमार्गस्य गौणत्वं सूचितम् इति न खलु न विदितं विदितवेदितव्यानाम् ।

गीतायाः यज्ञप्रवणत्वम्

भारतीयतत्त्वज्ञानप्रमाणभूतायां भगवद्गीताख्यायाम् उपनिषदि पुनः नान्योपनिषद्वत् कर्म-भक्ति-ज्ञान-योगप्रतिपादनाऽभिनिवेशितया वैदिको यज्ञमार्गः अधिक्षिप्तः न वा उपेक्षितः इत्येतद् गीतायाः अपूर्वत्वं खलु मन्यामहे । श्रीमद्भगवद्गीतायाः यज्ञप्रवणत्वं केवलेन विहंगावलोकनेनापि द्रष्टुं शक्यते । छान्दोग्योपनिषदि **" स य इदमविद्वानग्निहोत्रं जुहोति यथा अङ्गारानपोह्य भस्मनि जुहुयात् तादृक् तत् स्यात्** (५–२४–१) इत्यस्मिन् मन्त्रे प्रसिद्धाग्निहोत्रनिन्दां सुस्पष्टं कृत्वा ब्रह्मात्म्यैक्यानुभूतिविहीनैः कृतस्य हवनस्य भस्मोच्चयकृतहवनवद् नैरर्थ्यं निवेदितम् । एवं च अस्मिन् मन्त्रे **"प्रसिद्धाग्निहोत्रनिन्दया वैश्वानरविदोऽग्निहोत्रं स्तूयते "** इति भाष्यकाराः श्रीजगद्गुरुचरणाः विशदीकुर्वन्ति । एवं च कठोपनिषदि यस्य यज्ञमार्गस्य अदृढप्लवतुल्यतया नैरर्थ्यं दर्शितं तस्यैव यज्ञमार्गस्य तद् नैरर्थ्यं न खलु ऐकान्तिकम् आत्यन्तिकं वा इति छान्दोग्योपनिषदि वैश्वानरविदा कृतस्य अग्निहोत्रस्य स्तवनेन प्रतिपाद्यते ।

श्रीमद्भगवद्गीतासु तु यज्ञमार्गस्य माहात्म्यं तृतीयाध्यायादारभ्य अन्तिमाध्यायपर्यन्तं बहु बहु कृतमवलोक्यते । समग्रे गीताग्रन्थे यज्ञविषयिणः त्रिंशदधिकाः मन्त्राः उपलभ्यन्ते येषु गीताप्रवक्तुः पूर्णावतारस्य

भगवतः श्रीकृष्णस्य यज्ञपरायणत्वं सुष्ठु मतिपथम् अवतरति । तथाहि गीतायाः तार्तीयिकेऽध्याये

"**यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।**" इत्यत आरभ्य, "तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्" इत्यन्ते श्लोकसप्तकं, यज्ञः खलु इष्टकामधुक् । यज्ञेन देवा भाव्यन्ते । यज्ञभाविता देवा इष्टान् भोगान् याज्ञिकेभ्यो ददति । यज्ञशिष्टाशिनः सन्तः सर्वकिल्बिषैः मुच्यन्ते । यज्ञात् पर्जन्यो भवति । सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् । इत्येवंरूपा यज्ञस्तुतिः श्रुतिपथम् अवतरति । एवं च कर्मयोगविषयिणि अध्याये यज्ञप्रशंसां कुर्वता भगवता प्रकटीकृता स्वीया यज्ञमार्गप्रवणता ।

चतुर्थेऽध्याये "**काङ्क्षन्तः कर्मणां सिद्धिम्**" इत्यस्मिन् मन्त्रे देवयजनेन कर्मणां सिद्धिः मानुषे लोके क्षिप्रं भवतीति ज्ञाप्यते ।

तथा च "**गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ।**
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥३३॥"

इत्यस्मिन् मन्त्रे ज्ञानावस्थितचेतस्कतया मुक्तेनापि यज्ञकर्म आचरितव्यम् इति भगवदभिप्रायः सुष्ठु व्यज्यते । ईदृशेन ज्ञानिना मुक्तेन वा कृतम् अग्निहोत्रं सार्थं भवति, अतादृशेन पुनः कृतं भस्महवनवद् निरर्थं भवतीति छान्दोग्याभिप्रायः उपरिष्टान् निर्दिष्ट एव अस्माभिः ।

अस्मिन्नेव चतुर्थेऽध्याये "**दैवमेवापरे यज्ञं योगिनः पर्युपासते ।**" इत्यस्मात् २५ तम-श्लोकाद् आरभ्य ३१ तमश्लोकपर्यन्ते श्लोकसप्तके योगमार्गप्रसिद्धाः यम-नियम-प्राणायाम-प्रत्याहाराख्याः चित्तवृत्तिनिरोधोपायाः यज्ञतुल्या एवेति संसूच्य यज्ञस्य प्रसिद्धोपमानतया प्राशस्त्यं भगवान् द्योतयति । प्रसिद्धं हि खलु लोके प्रशस्यस्तवनावसरे उपमानतया उपादीयते नाप्रसिद्धम् । "**श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति**" इत्यादिना "आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते" इत्यन्तेन श्लोकयुग्मेन चित्तवृत्तिनिरोधोपायान् यज्ञोपमानेन स्तुवन् भगवान् यज्ञस्यैव ज्यायस्त्वं अङ्गीकरोतीति को नु खलु सुज्ञो नाभ्युपगच्छेत् । तथा च — "**द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ।**
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥

इत्यारभ्य, '**एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे**' इत्यन्तेषु

श्लोकेषु बहुविधान् यज्ञान् प्रतिपाद्य सर्वविधैः यज्ञः कल्मषं क्षयं याति इति भगवदभिप्रायः ' **सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः** ' इति वचनेन स्फुटीभवति । किंबहुना,

" **यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।**
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ।।३१।।

इति अनेन मन्त्रेण तु अभ्युदयनिःश्रेयससिद्धिप्रदो यज्ञ एव इति भगवदभिप्रायः न निह्नुतः ।

" **यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः** " ।

इतीदं धर्मलक्षणं सर्ववादिभिः अभ्युपगम्यते । अस्मिश्च पुनः श्लोके यज्ञस्यैव अभ्युदयनिःश्रेयस-सिद्धिप्रदत्वं सुव्यक्तं प्रतिपाद्य यज्ञ एव धर्मः इति तत्त्वं भगवता न किं न ध्वनितम् ?

एवं च सर्वत्र गीतासु तत्र तत्र यज्ञमाहात्म्यं बहुशः प्रतिपादयन् भगवान् अन्तिमेऽध्याये कर्मत्यागस्य तत्त्वं जिज्ञासवे पार्थाय,

" **यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्**
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् "

इत्यनेन श्लोकेन स्वीयं निश्चितं मतमुत्तमम् निवेदयति ।

भगवद्गीता खलु अस्माकं हिन्दूनां सर्वेषां परमप्रमाणभूतो ग्रन्थः । गीता खलु साक्षाद् भगवदुदिता उपनिषदेव । परम् अन्यासु उपनिषत्सु यथा यज्ञविषयिणी प्रतिकूलता उदासीनता उपेक्षाबुद्धिर्वा अवलोक्यते न तथा श्रीमद्भगवद्गीतासु उपनिषत्सु । प्रत्युत गीता खलु यज्ञपक्षपातिनी इति अस्माभिः मनाग् दर्शितम् ।

सोऽयं यज्ञमार्गः साम्प्रतम् उत्सन्नप्रायः । परं क्वचित् कदाचिदेव अधरोत्तरारणि-निर्घर्षणोद्दीपितस्य, परमात्मनिःश्वसितभूतानां वैदिकमन्त्राणाम् उद्घोषणैः साकम् आज्याहुतिभिर्हूयमानस्य यज्ञहुताशनस्य जाज्वल्यमाना अर्चिर्माला धूमरेखा वा पुनातीदं भूमण्डलम् ।

साम्प्रतम् अस्मिन् परमपवित्रे अक्कलकोटक्षेत्रे विश्वशान्त्यर्थं प्रवर्तमानोऽयं सोमयागः विश्वस्मिन् सर्वत्र शान्तिप्रभां विद्योतयिष्यतीति श्रद्दध्महे ।

एवं यज्ञमहोत्सवावसरे समायोजितेऽस्मिन् महाराष्ट्र-संस्कृत-परिषदोऽधिवेशने यज्ञविषयम् अधिकृत्य यत् किमपि गीताधारेण प्रारम्भे

प्रतिपादितं तदनधिकारचेष्टितमपि समयोचितमेवेति मत्वा विशेषज्ञाः सौहार्दतया हृदि धारयिष्यन्तीति बाढम् आशासे ।

* * *

संस्कृतभाषायाः सांप्रतिकी स्थितिः

अतिप्राचीनकालत आरभ्य संस्कृत-भाषायाः महिम्नः स्तोत्रं जेगीयते सर्वत्रैव। वर्तमानेऽपि काले न विरतोऽसौ संस्कृतमहिम्नः स्तोत्रपाठः । लब्धस्वराज्ये भारते प्रादेशिकभाषाभिमानातिरेकेण अन्योन्यं कलहार्थम् उद्युक्ता अपि नेतारः न खलु नास्तुवन् स्तुवन्ति वा संस्कृतम् । केन्द्रीयैः तथा प्रादेशिकैश्च शासनाधिकारिभिः यथारुचि संस्कृतोत्साहनार्थं किमपि किमपि क्रियते एव । विश्वविद्यालयेषु अपि सर्वत्र स्नातकोत्तरविभागेषु पठन्तः प्रौढच्छात्राः पाठयन्तश्च प्राध्यापकाः संस्कृतविषयानुबन्धि गवेषणाकार्यं सोत्साहं कुर्वन्तीति दृश्यते । संस्कृतग्रन्थानां मुद्रणप्रकाशनानि अपि बहुशः यत्र तत्र भवन्ति। संस्कृतनाटकानि रङ्गमञ्चेषु प्रयोज्यन्ते । आकाशवाणी-केन्द्रतश्च संस्कृतं प्रसार्यते। संस्कृतज्ञानां सांवत्सरिकाणि संमेलनानि अपि यथावसरं समायोज्यन्ते। संस्कृतपण्डिताश्च शासनधरैः दानमानादिना काले काले सत्क्रियन्ते । एवं सर्वत्र निनदत्यपि संस्कृतडिण्डिमे नानुभवन्ति परितोषं संस्कृतानुरागिणः संस्कृताध्ययनस्य क्रमशः प्रवर्धमानां ग्लानिं विलोक्य । वदन्ति च बहवश्चिन्ताकुलतया यद् "एवमेव संस्कृताध्येतॄणां संख्याबलं क्रमशश्चेद् ह्रासं यायात्, संस्कृतविद्यानदीष्णा गच्छता कालेन गगनारविन्दसधर्माणो भविष्यन्तीति"। परःसहस्त्रेष्वपि कृततीर्थेषु नोपलभ्यन्ते कराङ्गुलिगणनीया अपि संस्कृतशास्त्रविशारदाः । मन्दमति-दुरवगाहतया अस्तु दूरे शास्त्राध्ययनं, संस्कृतभाषाध्ययनेऽपि न प्रवर्तन्ते तरुणाः। कविवरेण शूद्रकेण हि संस्कृतं पठन्ती स्त्री हास्यास्पदं भवतीति नाटकीयपात्रमुखेन निवेदितम् । साम्प्रतं विश्वविद्यालयीनसंस्कृतविभागेषु स्त्रिय एव संस्कृतं पठन्त्यः अवलोक्यन्ते । किंबहुना स्त्रीबहुले संस्कृतवर्गे संस्कृतं पठन् पुरुष एव भवति वयस्यानाम् उपहासास्पदम् ।

संस्कृतप्रचारार्थं यदि कश्चित् सोत्साहः पण्डितः सस्कृतवर्गं सञ्चालयितुम् इच्छति तर्हि छात्राभावेन स सीदति । तत्रैव नगरविभागे

यदि कश्चिद् जर्मन-फरेञ्च-रूसीत्यादि-यूरोपीयभाषाणां प्रचारार्थं वर्गं संचालयति तर्हि तत्र महान् सम्मर्दः सम्मिलति छात्राणाम् । अन्यासां भाषाणाम् अध्ययनं भारते न भवत्विति न वयं ब्रूमहे । परम् अन्यासामेव भाषाणाम् अध्ययने समुत्सुकतया स्वभाषाध्ययने निरुत्सुकतां यदि भारतीयाः प्रकटयिष्यन्ति तर्हि न तत् कल्याणोदर्कं मन्यामहे । न खलु हुताशनमुखाभ्यन्तर्गतं स्वं गृहं विहाय परस्योद्यानं सिञ्चति कश्चन विवेकी । अतिप्राचीनकालतः नानाविधविपत्सु अस्मत्पूर्वजैः परिरक्षिता संस्कृतभाषा स्वराज्योदयानन्तरं यदि दयनीयां दुरवस्थाम् अश्नुते तर्हि तत्र अक्षम्यो दोषोऽस्माकमेव । विशेषतश्च राजनैतिकं शैक्षणिकं न्यायालयीनं च सर्वविधं व्यवहारं स्व-स्व-प्रादेशिक-भाषा आश्रित्य कर्तुं बद्धपरिकरं राष्ट्रमिदं संस्कृतविषयकेन औदासीन्येन आत्मन्येव कुठारपातं करोतीति न विस्मर्तव्यम् । यतो हि राजनैतिकं शैक्षणिकं न्यायालयीनं वा व्यवहारं प्रादेशिकभाषाधारेण कर्तुं या शब्दसमृद्धिः साम्प्रतं सर्वत्र अपेक्ष्यते सा हि संस्कृत-व्युत्पत्तिशास्त्रम् अन्तरा न निर्मातुं शक्यते । पाश्चात्यभाषीयाणां शब्दानां भारतीयभाषाभिः सात्म्यं नास्तीति न ते साकल्येन स्वीकारम् अर्हन्ति । प्रादेशिक्यश्च भाषाः व्यवहारक्षमा अपि अर्थगर्भनवशब्दनिर्माणे वन्ध्या एव सर्वथा । तदिदम् नवशब्दनिर्माणसामर्थ्यं संस्कृतभाषाया असाधारणं वैशिष्ट्यम् इति जगज्जानाति सकलम् । अतः साम्प्रतं संस्कृतभाषाध्ययनं न केवलं साहित्य-व्याकरण-तत्त्वज्ञानादि विषयाध्येतॄणां कृते अपि तु नव्य-कृषि-स्थापत्यायुर्विज्ञान-रसायनादि-शास्त्राध्येतॄणां कृतेऽपि नितान्तम् आवश्यकम् । केन्द्रीयशासनेन निर्मीयमाणेषु वैज्ञानिकशब्दकोषेषु अपवादविषयपरिहारेण प्रायः सर्वे शब्दाः संस्कृतोद्भूताः संस्कृतैकनिष्ठा एव । एतेषां शब्दानां सम्यगुच्चारणलेखनार्थं पदच्छेदार्थं तन्निहितार्थावधारणार्थं च संस्कृतभाषायाः मूलग्राहि ज्ञानं छात्रेषु प्राध्यापकेषु अपि चापेक्ष्यते । तदभावे कीदृशा अनर्थाः बहुलीभवेयुः इति तर्कयितुं शक्नुवन्ति भाषामर्मविदः । तामिमाम् आपतिष्यन्तीं सम्भाविनीम् आपदं प्रतिकर्तुं संस्कृतभाषाध्ययनम् अनिवार्यं कृत्वा प्रकटनीया काऽपि अनागतविधातृता प्रत्युत्पन्नमतिता वा शासनाधिकारिभिः इति अपेक्षामहे ।

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ।

इति त्रिकालाबाधितं नीतिसूक्तं न कदापि विस्मर्तुम् अर्हन्ति शासनाधिकारिणः ।

भाषामूलको विच्छेदवादः

भाषाधिष्ठित-पृथग्राज्यनिर्मितेः कटुकानि फलानि राष्ट्रैक्य-काङ्क्षिणां सर्वेषामेव महानुभावानां मनःस्वास्थं दूषयन्तीव । धर्म-संस्कृति-परम्परादिभिः एकात्मतां दधदिदं सनातनं राष्ट्रं प्रादेशिकभाषाभिमानान्धितधियां राजनीतिवाणिज्यजुषां केषाञ्चिद् नेतृब्रुवाणां दुश्चेष्टितैः विकलाङ्गतां यातीति दृष्ट्वा कस्य खलु सचेतसो मनो नो दोदूयेत । केनोपायेन भाषाभेदोद्भूतः आलर्कविषसोदरः राष्ट्रविच्छेदवादोऽयं विलयं यास्यतीति चिन्ताकुलाः बहवो महानुभावा सज्जनाः । परं हा हन्त । भाषाद्वेषाशीविष-विषप्रशमन-रसायनं संस्कृतभाषास्वरूपं सन्निकटे वर्तमानमपि किंबहुना हस्तगतमपि लोकधुरीणा न पश्यन्तीति महद्दुर्भाग्यम् अस्य राष्ट्रस्य । संस्कृतभाषायाः सकलभारतीयभाषाधार-भूतत्वात् सकलभाषापरिपोषण-समर्थत्वात् च संस्कृतभाषाप्रचारेण सकलभाषासु तुल्यरूपता अनायासेनैव समुद्योतेत । सेयं तुल्यरूपता यथाक्रमं वर्धमाना भाषाभेदभावस्य मूलमेव विच्छिन्द्यात् इति निश्चितम् अस्माकं मतम् ।

मराठी-शुद्धलेखने संस्कृतेऽत्याचारः

प्रादेशिक-भाषादुरभिमानेन अन्धीभूताः केचन अधिकारिणोऽपि स्वभाषायाः पृथगात्मकतां घटयितुम् उद्युक्ताः सन्ति । दुर्भाग्येन महाराष्ट्रस्थाः शासनाधिकारिणः अस्मिन् विषये अग्रेसराः । महाराष्ट्रभाषायाः शुद्धलेखनार्थं नूतना नियमाः यैः शासनाधिकारिभिः बलाद् आरोपिताः तैः खलु नितान्तमत्याचरितम् । भारतीयभाषाणां संस्कृतमूलतया सर्वासु तासु प्रतिशतं सप्तत्यधिकं संस्कृतशब्दाः उपयुज्यन्ते स्वीयतया । मति-बुद्धि-शक्ति-साधु-धेनु-भानु-प्रभृतयः शतशोऽथ सहस्रशः इकारोकारान्ताः संस्कृतशब्दाः सन्ति अखिलभारतीयाः । अतस्तेषां ह्रस्व-दीर्घत्वादिकम् अखिलभारते तुल्यमेव-विशेषतश्च संस्कृतानुगुणमेव अपेक्ष्यते । परं

दुर्भाग्येन मराठी-वैयाकरणैः स्वभाषा-पार्थक्य-प्रवर्तनाभिनिवेश-वशात् ह्रस्वेकारोकारान्तानां दीर्घीकरणेन नूनं प्रकटीकृतं स्वीयम् अदीर्घदर्शित्वम्। अस्मिन् संस्कृतशब्दानां दीर्घीकरणप्रयोगे साहाय्यं प्रददद्भिः महाराष्ट्र शासनाधिकारिभिरपि नूनं प्रदर्शिता कापि अविमृश्यकारिता।

प्रजानां विनयाधाने रक्षणे भरणे चैव शासनस्य अधिकारः न ह्रस्वान्तानां शब्दानां दीर्घीकरणे। स खलु विदुषां विषयः। संस्कृतशब्दानां स्वरूपे विकृतिम् आपातयद्भिः महाराष्ट्रशासनाधिकारिभिः न खलु समुचितम् आचरितम्।

अस्मिन् मराठी-शुद्धलेखनविषये संस्कृतज्ञानां संस्कृताभिमानिनां च सर्वेषां परममिदं कर्तव्यं यत् तैः स्वीये मराठीलेखने संस्कृतशब्दानां मूलभूतं शास्त्रशुद्धमेव स्वरूपं प्रयोक्तव्यमिति। दैनिकसाप्ताहिकादिनियतकालिकसम्पादकमहाशयैः तथा ग्रन्थलेखकैः अपि मराठीभाषान्तर्गत-संस्कृतशब्दानां विशुद्धत्वरक्षणे उत्साहशक्तिः प्रकटनीया इति साग्रहं प्रार्थयामहे।

राष्ट्रभाषानिर्णयः।

भारतीये भाषाविवादे राष्ट्रभाषाविषयः न सम्यग् अद्यापि निर्णीतः। अखिलभारतीयव्यवहारार्थम् उपयोगार्हा भाषा खलु भारतस्य राष्ट्रभाषा भवितुम् अर्हति। हिन्दीभाषाभाषिणां बहुसंख्याकत्वात् सा हिन्दी एव राष्ट्रभाषा पदम् अलंकरोतु इति प्रचार एतावता कालेन सर्वत्र भारते अक्रियत। परं स्वराज्योदयानन्तरम् पञ्चदशवर्षाणि आङ्ग्लीभाषां संरक्षद्भिः भारतभाग्यविधातृभिः नूनं भाषाभेदमूलं विभाजनबीजमेव अभाविततया रक्षितम्। १९६५ खिस्ताब्दतः आरभ्य तमिळभाषीयैः हिन्दी-भाषायाः तत्तुल्यत्वात् च संस्कृतभाषायाः निर्मूलनसत्रं बत प्रवर्तितं सर्वत्र तमिळनाडुभागे। 'हिन्दी उच्चाटयताम्' इति हि तेषां घोषणावाक्यम्। विगते वर्षत्रये अयं हिन्दीविरोधः कीदृशीं परां कोटिं गत इति जानन्त्येव सर्वे। नाहं तद्विषयेऽत्र किमपि वक्तुम् इच्छामि। परं राष्ट्रभाषात्वेन ख्यातिं प्रापितायाः हिन्दीभाषायाः आत्यन्तिकेन विरोधेन का खलु भारतस्य वास्तविकी राष्ट्रभाषेति समस्या पुनरपि उत्तिष्ठते। राष्ट्रभाषेति शब्द एव केवलं हिन्दीभाषार्थे नेतृभिः

रूढिं प्रापितः। न तैः राष्ट्रभाषायाः शास्त्रीयम् अव्याप्त्यतिव्याप्तिदोष-विरहितं लक्षणं निर्धारितं प्रचारितं वा। अत एव राष्ट्रभाषाविषयिणी समस्या प्रादुर्भूतेति अस्माकं मतम्। राष्ट्रभाषायाः सकलसाधारणं लक्षणं निर्धार्य तल्लक्षणोपेता या भाषा स्यात् सा एव राष्ट्रभाषापदम् अलंकर्तुम् अर्हति। अस्मिन् विषये अस्माभिः बहुशः विचिन्त्य राष्ट्रभाषायाः साधारणं लक्षणं निर्धारितम्। तद् यथा—

यस्याम् अखिलराष्ट्रस्य संचितं ज्ञानवैभवम्।
आत्मीयत्वं च सश्रद्धं राष्ट्रभाषेति सा मता॥
प्रादेशिकीनां भाषाणां सर्वासां जन्मदायिनी।
तथा पोषणकर्त्री च राष्ट्रभाषेति सा मता॥

जगतीतलेऽस्मिन् सर्वेषु राष्ट्रेषु याः काश्चन राष्ट्रभाषापदवाच्या भाषाः सन्ति तासु सर्वासु राष्ट्रभाषालक्षणमिदम् उपपद्यमानमवलोक्यते। भारतवर्षे हि आसेतुहिमाचलं विविधप्रादेशिकभाषाविराजिते उपरि-निर्दिष्टं राष्ट्रभाषाया निर्बाधं लक्षणं केवलं संस्कृतभाषायामेव उपपद्यते। अतः सा एव भारतस्य सिद्धान्ततः राष्ट्रभाषा आसीत् अस्ति च। सर्वासु प्रादेशिकभाषासु जीवभूततया प्रस्फुरन्ती अपि दुर्भागधेय-प्रभाव-वशात् तस्याः सार्वत्रिकः प्रचारो नावलोक्यते। अस्मिन् विषये नवोदितस्य चिरकालं दुर्दैवताडितस्य इस्रायलराष्ट्रस्य उदाहरणं भारतीयैः सर्वैरेव स्मरणसरणिम् आनेतव्यम्। चिराय विलुप्तप्रायाऽपि स्वीया हिब्रूभाषा तैः भगीरथप्रयत्नैः पुनरुज्जीव्य राष्ट्रभाषापदे व्यवस्थापिता। नास्ति खलु किमपि दुष्करम् उत्साहशक्तिसंपन्नानां बद्धव्रतानाम्। भारतवर्षे संस्कृत-भाषायाः महिम्नः स्तोत्रं निरन्तरं प्रगायद्भिः अस्माभिरेव न प्रकटीकृता सामग्र्येण स्वीया उत्साहशक्तिः। प्रभुशक्तिं विना दुःसाध्यानि संकल्पितानीति विचारः भारते सर्वत्र दृढमूलतां गत इव अवलोक्यते। केन्द्रियं प्रादेशिकं वा शासनं दण्डस्य प्रयोगेण कर्तुम् अकर्तुम् अन्यथाकर्तुं प्रभवति इत्यस्य विचारस्य प्रभावेन पङ्गूभूता इव अस्मद्बान्धवाः। संस्कृतोद्धारं नितान्तमावश्यकं मन्यमाना अपि संस्कृताभिमानिनः शासनाधिकारिणः संस्कृतम् अनिवार्यम् अध्ययनक्रमे कुर्वन्तु इति वाञ्छन्ति च। त्रिभाषा-सूत्रेण दृढबद्धं तथा राजनैतिकस्वार्थपरायणतया विवशीभूतं साम्प्रतिकं

शासनं संस्कृताध्ययनं न कदापि, अनिवार्यं कर्तुम् उत्सहेत। अत एव महाराष्ट्रशासनेन प्रवर्तितायां श्वेतपत्रिकायां संस्कृतस्य कृते पर्याप्तं स्थानं न विद्यते।

तदेवंविधायां परिस्थितौ संस्कृताभिमानिभिः अस्मादृशैः आत्मबलेन संस्कृत-प्रचारार्थं किं किं खलु शक्यते कर्तुं तदेव विचिन्त्य कार्यैकप्रवणैः भवितव्यम्। अस्मिन् कार्ये अस्मादृशैःसाधारणैरपि यद् यद् कर्तुं शक्यते तत्तद् विषये महाराष्ट्र-संस्कृत-परिषदः पञ्चमम् अधिवेशनमिदं प्रस्तावरूपेण मार्गदर्शनं करिष्यतीति आशास्य सर्वेभ्यश्च सज्जनेभ्यो भूयो भूयो नमोवाकं प्रणम्य विरमामि।

* * *

मुद्रकः प्रकाशकः — प. वसन्त अनन्त गाडगीळ
प्रधानमन्त्री महाराष्ट्र-संस्कृत-परिषद्
४२५ सदाशिव पेठ, पुण्यपत्तनम् २

शारदा-मुद्रण-सिद्धि-मन्दिरम् पुण्यपत्तनम् २

॥ श्रीः ॥

श्रीमतां लक्ष्मीकान्त-चक्रदेव महोदयानाम् भारतस्य भाषानीति-विषये महत्त्वपूर्णाः विचाराः ।

हरिः ॐ

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्द-माधवम् ॥

१ प्रास्ताविकम् ।

भोः स्वागताध्यक्ष-महोदयाः, सर्वे स्वागतसमिति-सदस्याः उद्-घाटक-महोदयाः, दूरदूरतः अत्र समागताः प्रतिनिधयः, गोण्डानिवासि-संस्कृत-अनुरागिणश्च; सर्वान्, सप्रेम, सादरं च अभिवादये ।

अयं किल महतः सौभाग्यस्य अवसरः यत् वयं सर्वे अत्र भगवतः श्रीरामचन्द्रस्य गोशालाभूते श्रीक्षेत्रे गोण्डानगरे अ. भा. संस्कृत महा-सम्मेलनस्य षष्ठम् अधिवेशनं संपादयितुं सम्मिलिताः स्मः ।

यद्यपि वयं गत चतुर्षु वर्षेषु दिवंगतेभ्यः महापुरुषेभ्यः, संस्कृत-पण्डितेभ्यश्च श्रद्धाञ्जलिं समर्पयितुम् एकं प्रस्तावं पारयिष्यामः एव तथापि अस्याः संस्थायाः अङ्गभूतानां डॉ. माधवश्रीहरि अणे, वेदमहर्षि-शतायुषि-पं. डॉ. श्रीपाद दामोदर सातवळेकर, डॉ. सम्पूर्णानन्द प्रभृतीनां पुण्यस्मरणं कृत्वा कार्यारम्भं करोमि ।

२ पं. श्यामकुमार-आचार्येभ्यः धन्यवादाः ।

सर्वप्रथमम् अहं भारतीय-विद्या-प्रचार-समितेः संस्थापकेभ्यः, अ. भा. सं. महासम्मेलन-नाम्न्याः अस्याः संस्थायाः पञ्चप्राणभूतेभ्यः म. म. पण्डितराज-श्यामकुमार-आचार्येभ्यः तथा च अन्येभ्यः कार्य-कारिमण्डल-सदस्येभ्यः हार्दान् धन्यवादान् वितरोमि यतः तैः मह्यम् अयं सु-अवसरः दत्तः भवतां संमुखं स्थातुम् । तेषाम् अभिनन्दनं च करोमि, एतस्मात् कारणात् यत् तैः इदम् अधिवेशनम् अस्मिन् समये आहूतम् अस्ति यदा संस्कृतविषये भारते सर्वत्र किंकर्तव्य-मूढता, नैराश्यम्, औदा-सीन्यं, निबिड-अन्धःकारश्च प्रसृतोऽस्ति। दिल्लीस्थित-अखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनम्, मुम्बईस्थिता संस्कृत-विश्व-परिषद्

आदिभिः महासंस्थाभिः पूर्वं, साधारणतः प्रतिवर्षं संस्कृत-सम्मेलनानि तु आकारितानि आसन्। किन्तु प्रायः गत-त्रिषु वर्षेषु ताभिः तदपि न कृतम्। अतः पं. श्यामकुमारैः आहूतस्य अस्य सम्मेलनस्य महत्त्वं स्वयमेव वर्धितम् अस्ति। अस्माभिः अत्र संस्कृतार्थम् स्वीयं न्याय्यं स्थानं प्रापयितुम् उपायाः अन्वेष्टव्याः, संसूचनीयाः सन्ति। न केवलम् इदम् अपि तु, तान् उपायान् कार्यान्वितान् कर्तुं प्रत्यक्षं कार्यमपि प्रारब्धव्यम् अस्ति। तत्कार्यस्य प्रथमपदरूपेण अहम् उपरोक्ताः संस्थाः प्रार्थये यत् ताभिः अविलम्बं स्वीयानि अधिवेशनानि आहूतव्यानि तेषु राज्येषु यत्र संस्कृत-प्रचारः क्षीणः यथा तमीळनाडु, केरल, ओरिसा।

३ मया आध्यक्ष्यं कस्मात् स्वीकृतम् ?

अत्र, अस्मिन् महत्त्वपूर्णे सम्मेलने संस्कृतस्य प्रकाण्ड–पण्डिताः, शास्त्रिणः, मीमांसकाः, नैय्यायिकाः, व्याकरणाचार्याः वेदवाचस्पतयः, आगच्छन्ति, यथा अत्र दृश्यन्ते। तेषां पुरतः मया अध्यक्षत्वेन कथं स्थातव्यम् इति मे मनसि महती शंका प्रादुर्भूता, यतः मम संस्कृताध्ययनं शून्यवत्, मम संस्कृतज्ञानम् अत्यल्पम्। इदं मम वैगुण्यं मम परम-मित्रं पं. श्यामकुमार आचार्याः न जानन्ति इति नैव। एवं भूतेऽपि तैः मम नियोजनं साभापत्ये कस्मात् इष्टम् इति अन्वेष्टुं मया तेषां प्रथम-पत्रतः एकं वाक्यं पुनः पुनः पठितम्। तद् इदम् "यावत्पर्यन्तम् संस्कृतं मातृ-भाषा, राष्ट्रभाषा, केन्द्रशासनभाषा, शिक्षा–माध्यम–भाषा न जायते, तावत्पर्यंतं भारतस्य प्रगतिः नैव भवेत्। अतः संस्कृतम् अेव भारतस्य राष्ट्रभाषा स्यात् इति प्रस्तावस्य अद्य महती आवश्यकता विद्यते। भवतां साभापत्ये एव अयं प्रस्तावः स्वीकर्तव्यः" इति। इदं तु संस्कृतस्य सद्यः परिस्थितेः राजकीयं वा शास्त्रीयं विवरणम्। यद्यपि नाहं संस्कृतार्थेन शास्त्री इति उपाधिधारी तथापि आधुनिकेषु भौतिक-शास्त्रेषु अहं नक-पदवीविभूषितः। मया अस्य भारतस्य भाषा-नीति-विषयस्य वैज्ञानिक-शास्त्रीय-विवेचक-पद्धत्या आमूलचूलं अनुशीलनं कृत्वा आङ्ग्ल-भाषायाम् एकं पुस्तकं लिखितमस्ति "यथार्थदर्शिन्" इति नाम्ना। मया अ. भा. संस्कृत-राष्ट्रभाषा-कारिणी सभा स्थापिता अस्ति यस्याः कार्यवाहित्वेन मया मराठी, आङ्ग्ली, संस्कृत–वाङ्मयीन-क्षेत्रे विविधासु सभासु, परिषत्सु, सम्मेलनेषु "यथार्थतः संस्कृतमेव भारतस्य राष्ट्र-भाषा अस्ति अतः सा एव केन्द्रशासनभाषा करणीया" इति प्रस्तावः प्रस्तूयते सर्वेषां विरोधम् अगणय्य। कदाचित् इदं सर्वं विचार्य

पं. श्यामकुमारैः अहं साभापत्यं स्वीकर्तुम् आज्ञापितः इति मत्वा मया मम वैगुण्यानि ज्ञात्वाऽपि केवलं कर्तव्य-बुद्धया एव इदं पदं स्वीकृतम् अस्ति। मम प्रारम्भिक-मंगलाचरणानुसारं परमानन्द-माधवस्य कृपया, अत्र भवतां सर्वेषां सहानूभूतिपूर्वकेण सहकार्येण च इमम् आध्यक्ष्यगिरिं लंघयितुं समर्थो भवेयम् इति विश्वसिमि। मम प्रवचनं शान्तेन मनसा श्रोतव्यम्। हंसक्षीर-न्यायेन यद् उपयुक्तं तद् ग्राह्यम् अन्यत् सर्वं त्याज्यम्, इति संप्रार्थये।

४ पूर्वकालतः एव भारतम् एकात्म-राष्ट्रम् किन्तु सांस्कृतिकम्।

अस्माकम् आसेतुहिमाचलं भारतं गत-पंचषट्-सहस्त्र-संवत्सरेषु एकराष्ट्रम् अेव तिष्ठति किन्तु तत् सांस्कृतिकम् एकराष्ट्रम्, वैदिक-सनातन-धर्माधिष्ठितायाः भारतीय-आर्य-संस्कृतेः एकराष्ट्रम् भारतम्। अतिपुराणे काले "कृण्वन्तो विश्वम् आर्यम्" इति अस्माकं ध्येय-वाक्यम् आसीत्। अतः अस्माकं वैदिकापौराणिक-संस्कृतेः प्रसारः कंबो-डिआ, जावा, सुमात्रा आदिषु, अतिपूर्व भू-भागेषु आसीत्। अस्य विधा-नस्य तत्रस्था आधुनिकी "बाली" संस्कृतिः एव प्रत्यक्षं प्रमाणम्। न केवलम् इदम् अपि तु अस्य भूगोलस्य व्यासस्य अपरः अंन्तः यः अमेरिका-देशीयः भूभागः तत्र अपि इयम् भारतीया संस्कृतिः गता आसीत् इति मध्य–अमेरिकायां जाते उत्खनने शिवदेवालयः प्राप्तः तस्मात् प्रतीयते। अचिरपूर्वं रशियायाः दक्षिण-ताझिगिस्थाने जाते उत्खनने कापिरकला इति पुरातनं मंदिरं प्राप्तम्। तत्र भोजपत्रोपरि ब्राह्मी-लिप्यां लिखितः एकः संस्कृत-लेखः अपि प्राप्तः।

पूर्वकालीनैः भारतीयैः राजकीयं वा शासकीयं वा आधिपत्यं गौणम् एव मानितम्। विभिन्नेषु भारत-प्रदेशेषु विभिन्नाः राजानः आसन्। ऐहिक-सुखार्थं ते परस्परं युध्यमानाः अपि आसन्। किन्तु सर्वेषाम् एका एव संस्कृतिः नाम भारतीया-संस्कृतिः आसीत्। तद् एव राष्ट्रम्। तद् एकम् एव आसीत्। अतः भारतं पूर्वकालाद् एव एक-राळ, एक-राट्, एक-राष्ट्रम्। तस्य एक एव "पीनलकोड" "सिव्हिल प्रोसीजर कोड" नाम मनु-याज्ञवल्क्यादि-स्मृतयः। एक एव 'सुप्रीम कोर्ट' काशी-वाराणशी-स्थिता विद्वत्-सभा। एका एव राष्ट्रभाषा-संस्कृतम्। एका एव शासन-भाषा-शिक्षा-माध्यमम् नाम संस्कृत भाषा, नालन्दा, तक्षशिला इत्यादिषु विद्यापीठेषु, यत्र चायनातः अपि विद्यार्थिनः आगतवन्तः आसन्।

५ निर्बन्ध-द्वय-कारणाद् अधःपतनम्

'न वदेत् यावनीं-नाम कापि परकीयां-भाषाम्' तथा च 'न कुर्यात् परदेश-गमनम्' इति निर्बन्धद्वयं कस्मिन् चिद् अपि काले तत्कालीनैः विबुधैः निहितम् इति स्पष्टम्, न जाने कस्मात् कारणात्। किन्तु परिणामः अयं जातः यद् अन्यत्र देशेषु, राष्ट्रेषु, का परिस्थितिः किं तत्र नूतनं संशोधितं? तैः कस्मिन् विषये कियती प्रगतिः कृता? इति महत्त्वपूर्णेषु विषयेषु भारतीयाः अज्ञानिनः एव अतिष्ठन्।

एकस्मिन् काले अस्माकं राष्ट्रं गणित-ज्योतिष-रसायन-आरोग्य-अर्थ-राजनीति-सुप्रजाजनन-स्थापत्य-आदिषु विषयेषु अपि अग्रेसरम् आसीत् यथा तत्त्वज्ञान-अध्यात्म-वाङ्मय-छन्दस्-न्याय-आदिषु शास्त्रेषु। यदा-प्रभृति उपरिनिर्दिष्टं निर्बन्धद्वयम् निहितम्, तस्मात् कालात् स्पृहायाः स्पर्धायाश्च अभावाद् अस्माकं प्रगतिः रुद्धा। कूप-मण्डूक-वृत्तिः प्रवृत्ता। भारतीय-पंडितानां मनसि "वयमेव सर्वज्ञाः" इति अहंकारोऽपि समुद्भूतः। अन्ते, गच्छता कालेन "अतिगर्वो विनाशाय" इति न्यायेन अन्य देशाद् आगतैः परराष्ट्रीयैः सकलो देशः पारतंत्र्य-शृंखलाभिः बद्धः-प्रथमं मुसलमानैः क्रौर्यादि पशुशक्त्या,ततःपरं डच-पोर्च्युगीज-फरेंच इत्येतैः, विशेषतः आङ्ग्लैः, तेषाम् उच्चतर ज्ञानविज्ञान-प्रभावेण, शिस्तबद्ध-युद्ध-शास्त्र-प्रावीण्येन, अस्माकंदेशीय-विविध-राज्ञाम् 'वयं पञ्चाधिकंशतम्' इति तत्त्वस्य अधिक्षेपात्,संकुचित-स्वार्थान्धबुद्धिकारणात् च।एवंगतेषुबहुषु-कालेषु, अस्माकं ज्ञानलालसापि लुप्ता,अज्ञानस्य अन्धकारः सर्वत्र प्रसृतः। मनुष्याणां शरीरस्थेन महारिपुणा आलस्येन वयं स्वापिताः। अस्माकं देशस्य प्रगतिः तथा कुण्ठिता यथा सुशिक्षिताः संस्कृत-पंडिताः शास्त्रिणश्च केवलं घटपटादि लटपटम् एव कुर्वाणाः जाताः। ते 'अग्नेः धूमस्य वा भावाभावाभावः-सदृक्षे शुष्कविषये कालापव्ययम् अकुर्वन्। तैः नवीनम् न किमपि संशोधितम् निर्मितम् वा। अस्माकम् अद्यतनीयेषु संस्कृत-पण्डितेषु अपि इयमेव प्रवृत्तिः दरीदृश्यते। तस्मादेव तेषां विषये अन्येषां भारतीयानाम् अपि मनसि अनादर-भावना तिरस्कारः दृढीभूतः अस्ति। स्वल्पमपि किमपि नवीनं द्रष्टुं तेषां मतिः नास्ति।

———रशिआ, अमेरिका, आदि-राष्ट्रीयाः चन्द्रोपरि गत्वा तत्रैव निवासं कर्तुम् दिगन्तप्रयत्नशीलाः, वयं तु संकष्टी-चतुर्थी दिने, यम-द्वितीयादिने च चन्द्रस्य दर्शनम् ग्राह्यम् न वा इति विषये शास्त्रार्थम् कुर्मः। 'हटाव अंग्रेजी' इति आन्दोलनं येन प्रकारेण, येन उद्देश्येन, यया पद्धत्या सचाल्यते, तेन तथा एव परिणामः पुनः भवेत्, यः परिणामः अस्माभिः

महाराष्ट्रराज्ये सद्यः अनुभूयते; नाम, अखिल-भारतीय-सेवा-परीक्षासु न एकोपि महाराष्ट्रीय-विद्यार्थी उत्तीर्णः। अस्मिन् विषये अधिकम् अग्रे विवरणं भवेत्।

६ भारतं राजकीयम् एकात्मं राष्ट्रम्
आङ्ग्लैः कृतम् गत-सार्धशतके।

यदा यूरोपदेशीयाः अत्र आगताः तदा लघु, लघु राजानः, आत्मनां मिथः सदा कलहायमानाः, विविधप्रदेशेषु राज्यं कुर्वन्ति स्म। विविधेषु भौतिकशास्त्रेषु प्रगतैः प्रगतिशीलैश्च तैः परकीयैः, विशेषतः आङ्ग्लैः, सुसज्ज-शिस्तयुत सैन्य-व्यवस्था-कारणात्, कौटिलीय-राजनीति-नैपुण्यात् च, एकैकं राज्यं पादाक्रान्तम्। अन्ते सर्वोऽपि भारतदेशः एकया एव शासन-व्यवस्थया, एकया एव शिक्षण-पद्धत्या, एकया एव भाषया, आधुनिकेन शासकीयेन राजकीयेन च अर्थेन, एकच्छत्रं 'भारतीयं साम्राज्यम्-इण्डिअन अेम्पायर' आङ्ग्लशासकैः अत्र निर्मितम्। एक-शतकपर्यन्तं शांतता स्थापिता। तैः दत्तेन आधुनिक-विश्वविद्यालयीनेन शिक्षणेन भारतीयैः एका नूतना एव विशाला, शास्त्रीया, दिव्यदृष्टिः प्राप्ता यस्याः, सर सी. व्ही. रामन्, डॉ. भाभा, डॉ. खुराना आदिभिः भारतीय-शास्त्रज्ञैः कृतम् संशोधनं प्रत्यक्षं प्रमाणम्। तस्मात् तत् शिक्षणम् 'व्याघ्न्यः दुग्धम्' इति विशेषणेन विष्णुशास्त्री चिपळूणकर इत्येतैः गौरवितं विद्यते। अखिले तदङ्किते भारते कापि एका एव भाषा शिक्षणमाध्यमार्थं शासनार्थं च आवश्यिकी इति लॉर्ड मेकॉले महोदयैः सुविचार्य निर्णीतम्। सा यदि भारतीया भवतु तर्हि संस्कृतभाषा एव सार्वभारतीया विद्यमाना भाषा इति तेन संशोधितम्। किन्तु आङ्ग्लशासकानां सौकर्यार्थम् तैः अन्ते 'सा एका भाषा का भवतु?' इति प्रश्नस्य उत्तरम् 'आङ्ग्ली' इति दत्तम्। तस्याः भाषायाः शिक्षणं सर्वस्मिन् देशे प्रारब्धं यत्र तत्पूर्वम् एकेन अपि भारतीयेन एकोपि आङ्ग्लशब्दः न ज्ञातः आसीत्। किन्तु त्रिंशत्-चत्वारिंशत् वर्षेषु सा परकीया, अति-कठिना, कस्याः अपि प्रादेशिक-भाषया-सह पूर्णतया असंबद्धा भाषा, यत्र प्रत्येकः शब्दः तस्य विचित्र-स्पेलिङ्ग-सहितम् केवलम् रटनेन एव-कण्ठी करणीयम् आसीत्, तादृशी भाषा, तावद्भिः जनैः आत्मसात् कृता यावन्तः भारतीयाः शासनार्थं, व्यापारार्थं, शिक्षणार्थं च आवश्यकाः आसन्।

ये अधुना कथयन्ति यत् संस्कृतभाषा अतिकठिना, एकेन अपि

भारतीयेन मातृभाषात्वेन न उपयुज्यते अतः सा न राष्ट्रभाषा अस्ति न च केन्द्रशासन-भाषा करणीया इति, तैः इदं सुविचार्यतया अवधेयम्, स्व-दुराग्रहः त्यक्तव्यः। तैः ये प्रयासाः आङ्ग्लशासकैः इंग्रजीकृते अत्र कृताः ते एव प्रयासाः भारतीय-शासकैः हिन्दी-मातृ-भाषिकैश्च संस्कृत-कृते कृताः चेत्, संस्कृतभाषा अखिले एव भारते, आङ्ग्लभाषायाः स्थानम् अवश्यं ग्रहिष्यति। तथा ते न कुर्वन्ति, तत् स्थाने, 'हिन्दी' इति एकां प्रादेशिकीं भाषाम् आनेतुम् इच्छन्ति, स महान् प्रमादः। आङ्ग्लैः अंङ्ग्रेजी-भाषया संस्कृतं मारितम् इति ये मन्यन्ते प्रचारयन्ति इदमपि अवधेयं यत् मेकॉले महादेयैः यद्यपि प्रथम-भाषारूपेण आङ्ग्ली गृहीता तथापि-तदुचित प्रथमस्थानात् वंचिता संस्कृत-भाषा द्वितीय-भाषारूपेण तु स्थापिता। अनेन तेषां गुणग्राहकता स्पष्टी-भवति।

एकविधम् एव शिक्षणम् एकया एव भाषया आसेतु हिमाचलम् सर्वैः भारतीयैः प्राप्तम् इति कारणाद् एव वैचारिकी एकात्मता 'लाल बाल-पाल, इति पंजाब-महाराष्ट्र-बंगाल-प्रदेशीयानां मनसि साधिता। स्वातंत्र्यार्थम् आन्दोलनं खानगफारखान-महात्मागांधी-विनोबा, केळकर-सी.आर.दास,सुभाषबोस,नेहरू, टण्डन, सत्यमूर्ति, राजाजी सी.पी. रामस्वामी अय्यर एतैः सर्वैः कृतम्। यदि तेषां सर्वेषां शिक्षणस्य माध्यम-भाषायाः ऐकात्म्यम् न अभविष्यत् तर्हि अस्माभिः स्यातंत्र्यम् एकस्मिन्नेव शतकान्तेन न अप्रापयिष्यत्। अङ्ग्रेजीभाषा यथा आङ्ग्लैः स्वार्थबुद्ध्या आनीता तथैव स्वप्रदेशस्य हिन्दीभाषा डॉ. राजेन्द्रप्रसादैः प्रतिष्ठापिता स्वार्थबुद्ध्या शेठगोविन्ददासैः प्रचार्यते स्वार्थबुद्ध्या ! अयमेव हन्दी-साम्राज्यवादः। सः दाक्षिणात्यैः विशेषतः तमिळनाडुजनैः न सह्यते।

७ स्वराज्यं प्राप्तं किन्तु ...!

सप्तचत्वारिंशत्तम-वर्षस्य ऑगस्ट पंचदश दिनाङ्के इदं सुसंघटितं सुशिक्षितं नूतनम् एव एकं शासकीयं एकात्म-राष्ट्रं (न केवलं पूर्व-कालीनवत् सांस्कृतिकं एकात्मराष्ट्रम्) स्वतन्त्रं जातम्। संविधान -सभा स्थापिता। तया राष्ट्रस्य नाम इण्डिआ अथवा हिंदुस्थान इति स्थाने पूर्वकालीन-नाम्नः पुनरुज्जीवनं कृत्वा 'भारतम्' इति कृतम्। इदम् अतीव सुन्दरम् औचित्यपूर्णं जातम्। शतावधि-देशीय-संस्थानिकानां राज्याणां विलीनीकरणेन सरदार पटेल महोदयैः राजकीयम् ऐकात्म्यं पूर्णतां नीतम्।

८ भाषाविवेक-भ्रष्टत्वात्...

इदं सांस्कृतिकं-राजकीयं-शासकीयम् ऐक्यं येन लवमात्रमपि ऊनीभवेत् तद् अस्माभिः विवर्जनीयम् आसीत्, येन तद् दृढतरं भवेत् तत् आग्रहपूर्वकम् करणीयम् आसीद्-अस्माभिः सर्वैः नाम, केन्द्र-सर्व-कारेण, प्रत्येकेन राज्य-सर्वकारेण, प्रत्येकेन राजकीयपक्षेण, प्रत्येकेन सुशिक्षितेन जनेन, सामान्य-जनतया च। अस्य निकषोपरि अस्माकं भाषानीतिः परीक्षणीया।

यस्माद् एकदा 'भारतम्' इति नाम पुनरुज्जीवितं, तस्मात् अन्यदपि सर्वं तत् सदृशमेव करणीयम् आसीत्। प्रायः तथा कृतम् अपि, यतः राष्ट्रस्य मानबिन्दु-भूतानि राष्ट्रध्वजः, राष्ट्रचिह्नं, राष्ट्रगीत, राष्ट्रध्येये (सत्यमेव जयते, धर्मचक्रप्रवर्तनाय) इति राष्ट्रवस्तूनि समीचीनानि निश्चितानि। तानि सर्वाण्यपि सर्वैरपि भारतीयैः, हिन्दु, मुस्लिम्, इसाई, पारशी, आदिभिः सम्मानितानि, अंगीकृतानि। तानि सर्वाण्यपि हिन्दुप्राधान्ययुतानि विद्यन्ते स्वाभाविकत्वेन एवः, यतः संख्यया भारते हिन्दवः अशीति-मिताः प्रतिशतम् विद्यन्ते।

निर्णीतानि इमानि वस्तूनि केवलं प्रतीकात्मकानि, क्वचित् काले उपयोक्तव्यानि। किन्तु अत्यावश्यकं प्रतिक्षणम् उपयोक्तव्यं वस्तु, नाम 'राष्ट्रभाषा' इति, न निर्णीतम्। अत्र किमपि कठिनं नासीत्। या पूर्वम् राष्ट्रभाषा आसीत्, या तदर्थम् नाम 'सार्वराष्ट्रीय' कार्यार्थं योग्या इति लॉर्ड मेकॉले महोदयैः मानितम् आसीत्, सा संस्कृत-भाषा पुनरुज्जीवनीया आसीत्। सा भाषा एकेन मुस्लिमेन एव पुरस्कृता आसीत् संविधान सभायां तस्य नाम अस्ति।

किन्तु तन्न मानितम्। आङ्ग्ल्याः स्थाने नाम यूनिअन् ऑफीशिअल् लॅङ्ग्वेज् स्थाने हिन्दी इति एका प्रादेशिकी एव भाषा संस्थापिता। 'राष्ट्रभाषा' स्थानमपि न निर्मितम् यत् स्थानं सर्वेषु राष्ट्रवस्तुषु प्रमुखम्। नववधूः आभूषणैः समग्रम् अलङ्कृता किन्तु भालप्रदेशे कुङ्कुमतिलकः न कृतः, तथा जातम् अस्ति इदम्। विना राष्ट्रभाषा-निर्णयं रचिता अस्माकं समग्राभाषानीतिः अयथार्था, दुष्टा, विनाशगर्भा! गत अष्टादश वर्षेषु अस्माकं प्रगतिः न जाता यथा अपेक्षिता तथा। तस्य एकम् इदं महत्त्वपूर्णम् कारणम्। अतः अस्य परिच्छेदस्य शीर्षकं पूरयामः "...चलति विनिपातः शतमुखः।

९ सांस्कृतिकम् एकात्मराष्ट्रं नष्टम् ।

जिना महोदयानां ' टू नेशन थीअरी ' द्विराष्ट्रवादं स्वीकृत्य देशस्य विभाजनं कृतम् । पाकस्तानम् इति मुस्लिमधर्मीयं राष्ट्रं निर्मितं किन्तु भारतम् इति राष्ट्रं हिन्दुराष्ट्रं न उद्घोषितम् अपितु निधार्मिकम् इति-सेक्युलर् इति !! न्यूनातिन्यूनं " मुस्लिमान् विहाय सेक्युलर् " इति तु करणीयम् आसीत् । तथा न कृतम् प्रत्युत, अल्पसंख्याङ्कानां मुस्लिमानां, ख्रिस्तीयानां च " व्होट " प्रापणार्थं तेषाम् अनुनयः कृतः । हिन्दु-कोड-बिल् सेक्युलर् राष्ट्रे कथं निर्मितम् ? अस्माकं " सेक्युलॅरिझम् " नाम हिन्दून् विहाय अन्यधर्मानुयायिनां राष्ट्रम् इति एव अर्थः जातः प्रत्यक्षम् कार्येषु । नागालॅण्ड इति राज्यं निर्मितम् ख्रिस्तीयानाम् । आसाम इत्यत्र पूर्वपाकिस्तानात् आगतानां मुस्लिमान निष्कासनम् अकृत्वा तेषां संख्या विवर्धिता । " मल्लापुरम् " इति तालुकां निर्माय एकं विषगर्भं दुष्टंकार्यं कर्तुम् उद्यतम् अस्ति अस्माकम् सर्वकारः । ब्राह्मण-जातीयानां सर्वत्रैव भारते दुःश्वासः क्रियते । " धर्म-चक्र-प्रवर्तनाय " इति हेतोः अस्माकम् राष्ट्रम् भारतम् पुनरुज्जीवितम् किन्तु ततः धर्मः एव बहिष्कृतः । परिणामः जातः अधर्मस्यैव प्रचारः । अधुना छुरीधारिणां लञ्चाग्रहकाराणाम् एव राष्ट्रम् अस्ति, अतः आङ्ग्लीयानां शासनकालेपि यद् स्वल्पं सांस्कृतिकम् ऐकात्म्यम् आसीत् तदपि विनष्ट-प्रायम् । धर्मश्रद्धा नष्टा । कुतः धर्मचक्र-प्रवर्तनम् !!

१० अस्माकं भाषानीतिः सर्वथा विनाशकारिणी ।

अस्माकं अस्य देशस्य सुवर्णकाले यद् राष्ट्रनाम आसीत् ' भारतम् ' इति, तत् पुनरुज्जीवितम् । तथा एव तस्मिन् सुवर्णकाले अस्माकं राष्ट्रस्य राष्ट्रभाषा का आसीत् तद् विचार्य अधुना पुनः तत्स्थाने सा प्रस्थापनीया आसीत् । किन्तु तत् स्थानमेव न निर्मितम् । आङ्गली भाषा अखिलस्यैव " आसेतु हिमाचलम् "-देशस्य शासनभाषा आसीत् एका एव । सा परकीया । अतः न राष्ट्रभाषा । अतःसाशासन-भाषा-स्थानात् निस्सार्या इति उचितमेव किन्तु तस्मिन् स्थाने राष्ट्रभाषा एव आनेतव्या । तदर्थम् अस्माकम् राष्ट्रभाषा का तत् निर्णेतव्यम् आसीत् । तदर्थं मूलतः विचार्य राष्ट्र-भाषायाः व्याख्या करणीया आसीत् । तां कर्तुम् अस्माकं संविधान-सभया न प्रयतितम् । आङ्ग्ल-भाषायाः स्थाने एका **प्रादेशिकी भाषा** आनीता नाम हिन्दी इति ! अनेन एकं " दुष्टचक्रम् प्रवर्तितम् " न धर्मचक्रम् " !!

संविधानस्य सप्तदशपर्वणः नाम अस्ति 'ऑफीशिअल् लॅङ्ग्वेज्' 'शासनभाषा' इति। तत् सत्यतः 'भाषानीतिः' इति निर्धारणीयम् आसीत्। स्वतंत्रे देशे राष्ट्रे वा प्रथमम् उच्चतमं स्थानम् अस्ति राष्ट्रभाषायाः। तत् न निर्मितम् किन्तु केन्द्र-शासन-भाषा-स्थानं निर्माय तत्र हिन्दी इति एका प्रादेशिकी एव भाषा स्थापिता। तत् न समीचीनं कृतम्।

जनानां मनसि उच्चतमं स्थानं राष्ट्रभाषायाः एव इति अस्ति। अतः यत् किमपि-स्थानम् उच्चतमं तदेव राष्ट्रभाषापदं, या-कापि-भाषा-तत्र स्थापिता, सा एव राष्ट्रभाषा इति जनाः मन्यन्ते। हिन्दी मातृभाषिकाः तु तथा साग्रहं मन्यन्ते प्रतिपादयन्ति च, न राष्ट्रप्रेम्णा अपि तु स्वार्थबुद्धया, यतः तेन तेषां भाषा महत्तम-स्थाने स्थापिता भवति यद्यपि वस्तुतः, सत्यतः, इतिहासतः, योग्यतया च, सा भाषा उच्चतमं स्थानं नैव अर्हति। अन्ये मातृभाषिकाः तस्य विरोधं कुर्वन्ति तत् सहजमेव। यदि हिन्दी इति प्रादेशिकी-सामान्या-भाषा राष्ट्रभाषा, तर्हि अस्माकं बंगाली, तामीळी, मराठी भाषा किं न राष्ट्रभाषाः?" इति पृच्छा सार्था एव। न, न, भारतस्य महामंत्रिभिः प्रत्यक्षं पंडित जवाहरलाल नेहरूभिः एव, सर्वा अपि अष्टमे परिशिष्टे निर्दिष्टाः भाषाः राष्ट्रभाषाः एव, इति उद्घोषितम्। अयं सर्वस्वी मिथ्यावादः। एकम् असत्यं गोपयितुं यथा दश असत्यानि वक्त--व्यानि भवन्ति तथा एव हिन्दी-भाषायाः मिथ्या-राष्ट्रभाषात्वं समर्थ-यितुं तेषाम् इदं कथनं विना अन्या गतिरेव नासीत्!

११ अस्माकं भाषा यदि राष्ट्रभाषा, तर्हि अस्माकं प्रदेशः राज्यम् वा किं न राष्ट्रम्? !!

अग्रे गत्वा अन्यदपि एकं, किन्तु भीषणतरं, प्रतिपादनं निस्सरति। यतः अस्माकं भाषा राष्ट्रभाषा तर्हि अस्माकं भूभाग-प्रदेशः राष्ट्रम् एव इति द्र. मु. क-जनैः मन्यते! तामीळनाडुः, अत एव, हिन्दी-भाषां परराष्ट्र-भाषारूपेण द्विषन्ति। स्वीयं सर्वतः स्वतंत्रं राष्ट्रम् अपेक्ष्यते तैः। तमीळ राष्ट्र-भाषा इति। आङ्ग्ली अन्ताराष्ट्रीया इति भाषाद्वयमेव अलम्, कुतः तृतीय-हिन्दी-भाषायाः आवश्यकता? 'हिन्दी अधः, तमीळ उपरि' इति घोषवाक्यं दृढं पालयन्ति। प्रादेशिक-हिन्दीभाषायाः केन्द्रशासनभाषा इति-सार्व-देशिक-भाषास्थाने स्थापनम् इति विषबीजस्यैव अयं विष-वृक्षः। बंगाल-राज्यमपि अधुना बंगालराष्ट्रम् कर्तुं कोपि एकः पक्षः निर्मितोऽस्ति। तस्य पक्षस्य सभासदैः हिन्दी अधः बंगाली उपरि इति भित्तिपत्राणि कलकत्तायां प्रदर्शितानि। नागालॅण्ड इति नवनिर्मितं राज्यं प्रायः

इसाई-जनानाम् एव, संख्या-आधिक्येन। अस्य राज्यस्य अन्य-राज्यैः साकं सांस्कृतिकम् अपि ऐकात्म्यं नास्ति। तद् राज्यम् चायनादिभिः, परराष्ट्रैः भारतात् बहिर्गमनार्थं प्रचोदितम् अस्ति; तद्राज्यं तु स्वीयं स्वतंत्रं राष्ट्रीयत्वम् प्रथमम् उद्घोषयिष्यति नूतन-निर्वाचनात्परम् इति मे दृढा भीतिः।

१२ भारतम् राजकीयं एकात्म-राष्ट्रम् अपि न तिष्टेत् यदि भाषानीतिः न परिवर्तिता भवेत्।

प्रत्येकं राज्यम् न भारतस्य प्रदेशः, विभागः वा, अपि तु स्वतन्त्रं राष्ट्रम् इति यद्यपि न केनापि उच्यते, तथापि कृतिः तु तथा एव अस्ति। अस्माकं गोधूमः कस्मात् अन्य-राज्येभ्यः देयः इति प्रश्नं पंजाब राज्यं पृच्छति। यदि देयः तर्हि यावत् शुल्कं वयं वाञ्छामः तावत् देयम् तैः। तैलबीज-विषये गुजरातराज्येन तथैव उक्तम् आसीत्। बीहार-राज्येन लोह-अभ्रक-विषये तथैव उक्तं चेत् न तत् विस्मयकारकम्!

हिन्दी-भाषायाः केन्द्र-शासन-भाषास्थाने स्थापनेन यः घोरः दुष्परिणामः जातः स एव अधुना पर्यन्तं वर्णितः। किन्तु अन्यद् अपि एकं भीषणतरं संकटं विद्यते तद्विषये अग्रे।

१३ डॉ. त्रिगुणसेनस्य विद्यापीठ-माध्यम-नीतिः सर्वथा भारतद्रोहिणी।

आसेतुहिमाचलम् स्वातन्त्र्यम् अस्माभिः लब्धम् एकेन एव माध्यमेन, एक-विधेन एव शिक्षणेन इति सुस्पष्टम्। सा एव नीतिः अधुना अपि चालनीया अस्ति।

किन्तु अधुना डॉ. त्रिगुण सेन–केन्द्रीय शिक्षा मंत्रिभिः अतीव दुष्टम् एकम् परिवर्तनम् सञ्चालितम् अस्ति। आङ्गल्याःस्थानं ग्रहीतुं हिन्दी असमर्था अस्ति इति तैः सम्यग् ज्ञातम्। का एका एव अन्या भारतीया भाषा तत्-स्थाने स्थातुं क्षमा तत् संशोधनीयम् आसीत् किन्तु तैः तथा न कृतम्- अपि तु सर्वाःअपि भाषाः राष्ट्रभाषाः इति पक्षं गृहीत्वा तासां भाषाणां स्तोमं वर्धयितुम्, स्फोटकवृत्तिः (फुटीरतावृत्तिः), पृथग्वृत्तिः परिपोषिता। तेषां सिद्धान्तः अस्ति 'विद्यापीठीयं शिक्षणम् अपि मातृभाषायाम् एव करणीयम्' इति। अधुना न्यूनात्न्यूनम् सुशिक्षित-भारतीयास्तु राज्य-निरपेक्षं वैचारिकम् आदान-प्रदानं कर्तुम् शक्नुवन्ति। किन्तु डॉ. त्रिगुण सेनानां विचारम् अनुसृत्य महाराष्ट्रीयः विद्यार्थी मराठी-माध्यमेन, बंगाली

विद्यार्थी बंगाली-माध्यमेन, मद्रासी-विद्यार्थी तमीळ माध्यमेन, बी. ए. वा एम्. एस्सी. वा वैज्ञानिकः वा भविष्यति तदा तेषां मिथः कोपि व्यवहारः न भविष्यति परस्पराणां भाषा-ज्ञानस्य अभाव-कारणात्। अनेन तु प्रत्येकं राज्यं सत्यतया एव स्वतन्त्रं राष्ट्रं भवेत्! अर्थात् प्रत्येकस्य अस्य 'राष्ट्रस्य' शक्तिःतु क्षीणा एव स्यात्!! भारते युरोपीय-राष्ट्राणाम् आगमनपूर्वम् या दयनीया परिस्थितिः आसीत् सा एव परिस्थितिः पुनः समुद्भवेत्। भारतस्य परितः पाकिस्तानं, रशिआ, चायना इति शत्रुराष्ट्राणि युद्ध-सज्जानि सन्ति एव। यदा भारतं राष्ट्रम् पञ्जाबः, उत्तरप्रदेश-बंगाल - गुजरात-महाराष्ट्र -तमीळनाडु-केरळ आदिषु पंचदश वा विंशतिः वा लघुलघु-राष्ट्रेषु (न तु राज्येषु) भग्नं भवेत् तदा इमानि शत्रुराष्ट्राणि एकैकं लघुराष्ट्रं स्वोदरस्थं करिष्यन्ति। पंजाबस्य साहाय्यार्थं मद्रासनाडू न आगच्छेत्, इच्छन् अपि साहाय्यं दातुं शक्ति-हीनत्वात्। यदि चायना आसामोपरि आक्रमणं करिष्यति तर्हि बीहारराष्ट्रं तस्य रक्षणार्थं गन्तुं न शक्ष्यति। गुजरातोपरि पाकिस्तानस्य आक्रमणं भवेत् तर्हि महाराष्ट्र–राष्ट्रम् किंकर्तव्यमूढम् एव तिष्ठेत्। अतः अहम् कथयामि यत् इयं विषगर्भा भाषानीतिः परित्याज्या। सा आमूलमेव पुनः रचनीया। आङ्ग्ल-शासन-काले यद् आङ्ग्लभाषायाः स्थानम् आसीत् शिक्षणक्षेत्रे राजकीयक्षेत्रे शासकीयक्षेत्रे च तत् स्थानम् शास्त्रशुद्ध रीत्या निश्चितायै राष्ट्रभाषायै दातव्यम्। इदं स्थानम् संस्कृतस्य एव इति नेतारः व्यक्तिगतरूपेण स्वीकुर्वन्ति किन्तु भाषानीति-परिवर्तने तेषां धैर्यं नास्ति! कदाचित् विचारार्थं कुशाग्रबुद्धिः नास्ति।

१४ केन्द्रीय–विद्यालय–संघटनम्।

प्रत्येकस्मिन् राज्ये केन्द्रीय-सर्वकारस्य कर्मचारिणः सन्ति। तेषां स्थलान्तरं कस्मिन् चिद् अपि अन्यस्मिन् राज्ये अकस्मात् भवति। ऐकभाषिक-राज्यानां निर्माणात्परं प्रत्येकस्मिन् राज्ये तत्रस्था शासन-भाषा एव शिक्षण-माध्यमं भवति शालासु-अधुना, श्वः महाविद्यालयेषु अपि भविष्यति दुर्दैववशात्। उपरिनिर्दिष्ट-कर्म-चारिणां बालानां कृते इदं न समीचीनम्। अतः केन्द्रीय-शिक्षा-मन्त्रालयेन 'केन्द्रीय-विद्यालय-संघट-नम्' निर्मितम् अस्ति येन भारतस्य प्रमुख-नगरेषु शालाः सञ्चाल्यन्ते यत्र सर्वत्रैव एक एव शिक्षणक्रमः विद्यते। पुस्तकानि अपि सर्वत्र एकानि एव। माध्यमं राज्यभाषा-निरपेक्षम्। केचित् विषयाः आङ्ग्लभाषा-माध्यमेन, उर्वरिताः हिन्दीभाषा-माध्यमेन, अध्याप्यन्ते। तत्र संस्कृत

भाषा अनिवार्यत्वेन अध्याप्यते। तत्र संस्कृतभाषायाः शिक्षणं तथा भवतु यथा सा भाषा व्यवहार-भाषा भवेत्। हिन्दीं विना कस्याः अपि अन्य प्रादेशिक भाषायाः शिक्षणं नास्ति। यदि कोऽपि इच्छेत्-तर्हि तेन तद् स्वगृहे एव प्रापणीयम्।

ईदृक्षाः शालाः महाविद्यालयाः च न केवलं केन्द्रीय कर्मचारिणां कृते अपि तु सर्व-नागरिकाणां कृतेऽपि संचालिताः भवन्तु। तदर्थं स्थानीय शिक्षण-संस्थाभ्यः अपि अवसरः देयः। स्थानीय-शिक्षण-संस्थाभिः अवसर-दानार्थम् केन्द्रीय-शिक्षामंत्रालयः प्रार्थनीयः।

अधुना तत्र संस्कृत-भाषा हिन्दी-माध्यमेन अध्याप्यते तत् न समीचीनम्। भाषा-शिक्षणार्थं सा एव भाषा माध्यमरूपेण गृहीतव्या यथा कॉन्व्हेण्ट स्कूले आङ्ग्लभाषा आङ्ग्लभाषा-माध्यमेन शिक्षिता भवति। संस्कृत भाषा अपि संस्कृत-माध्यमेन एव शिक्षिता भवतु।

अग्रे गत्वा एनम् अभ्यासक्रमम् अनुसृत्य विद्यापीठानि अपि स्थापनीयानि इति मे नूतन-शिक्षामन्त्रिभ्यः डॉ. व्ही. के. आर्. व्ही. राव महोदयेभ्यः विनम्रा प्रार्थना। ये देशस्य एकराष्ट्रीयत्वं सर्व-प्राथम्येन मन्यन्ते तेषां कृते इदम् आवाहनं विद्यते आह्वानं च। तैः तत् स्वीकर्तव्यम् यथा अस्माभि मुम्बई इत्यत्र स्वीकृतम् अस्ति 'श्रीवत्स बालमन्दिरम्' संस्थाप्य।

संस्कृत-भाषा-विषयः संस्कृत-माध्यमेन अध्यापितो भवतु इति अस्माभिः उपरि संसूचितम् अस्ति। शनैः शनैः अन्ये विषयाः अपि संस्कृत-माध्यमेन अध्यापिताः भवन्तु। केन्द्र सर्वकारस्य "बोर्ड फॉर प्रमोशन ऑफ् संस्कृत" विद्यते तेन इदं कार्यं करणीयम्। आवश्यिका प्रणालिः निर्मातव्या। पुस्तकानि तदर्थं लिखितव्यानि। अध्यापकाः शिक्षितव्याः। तदर्थम् एव एकं "ट्रेनिङ्ग स्कूल" प्रस्थापनीयम्। अधुना संस्कृत-अध्यापकाः न मिलन्ति इति विलापं कृत्वा संस्कृत-विषयः निष्कासनीयः इति किमपि विपरीतम् एव न वक्तव्यम्।

१५ राष्ट्र-भाषायाः शास्त्रशुद्धा व्याख्या।

यद्यपि संविधाने तथा नैव निर्दिष्टं तथापि बहवः जनाः, नेतारः, संस्कृत-पंडिताः, विशेषतः हिन्दी-मातृभाषिकाः मन्यन्ते यत् हिन्दी एव भारतस्य राष्ट्रभाषा, यतः भारतस्य अधिकाद् अधिकांश-जनानां सा मातृभाषा अस्ति। अधिकात् अधिकांश जनाः कति इति विचारिते सति प्रतीयते यत् तत् प्रमाणम् एक तृतीयांशमितम् एव अस्ति न प्रतिशतं ९०%

"अधिकाद् अधिकांश-जनानां मातृभाषा सा राष्ट्रभाषा" इति कल्पना
व्याख्या वा एकभाषि-राष्ट्रेभ्यः ऋणेन गृहीता अस्ति। सा बहुभाषि
राष्ट्रस्य कृते न समीचीना। हिन्दी द्वितृतीयांश-भारतीयानां शिरसि राष्ट्र-
भाषात्वेन आरोपिता भवेत् तर्हि तद् अन्यायकारकम्।

राष्ट्रभाषायाः सत्या, समीचीना शास्त्रशुद्धा, व्याख्या इयम्।
"यस्यां भाषायां कस्यापि राष्ट्रस्य संस्कृतिः, परंपरा, जीवन-
तत्त्वज्ञानं, ज्ञानभाण्डारं च अधिकाद् अधिक-प्रमाणेन सम्मिलितानि सन्ति
सा भाषा तद् राष्ट्रस्य राष्ट्रभाषा"। कति जनाः तां भाषां मातृभाषात्वेन
भाषन्ते अथवा जानन्ति तत् प्रमाणं नास्ति। इयं व्याख्या एकभाषि राष्ट्रा-
णां कृतेऽपि समीचीना। इमां व्याख्यां बहुभाषि-भारतराष्ट्रे, संस्कृत-भाषा
एव समाधत्ते। अतः भारतराष्ट्रस्य राष्ट्रभाषा संस्कृतमेव न अन्या काऽपि
भाषा। राष्ट्रभाषा-अन्वेषणे अन्योपि एकः आशु तथा लघु-निकषः (रफ् अँण्ड
रेडि टेस्ट) विद्यते; यथा "यां भाषां बहवः जनाः अज्ञात्वा अपि आद्रियन्ते
सा भाषा राष्ट्रभाषा"। भारते सर्वत्र (तमीळनाडु इत्यत्र अपि) आसेतु-
हिमाचलं, शिक्षितानां अशिक्षितानां च मनसि संस्कृतविषये एवं प्रेमादरौ
विद्येते समप्रमाणेन च सर्वेषु प्रदेशेषु। अनेन निकषेण अपि सिध्यति यत्
संस्कृतमेव भारतस्य राष्ट्रभाषा इति। न जाने कस्मात् किन्तु बहूनाम्
जनानां, विशेषतः राज्य यन्त्रचालकानां, मनसि संस्कृतस्य विषये द्वेषः
विद्यते, प्रायः अज्ञानकारणात्, ते संस्कृतं धिक्कुर्वन्ति। इदम् अज्ञानं
तज्जन्या द्वेषबुद्धिः च अस्माकं संस्कृतसंस्थाभिः दूरीकर्तव्या इति प्रधानं
कार्यम्।

१६ अधुना एक एव आशाकिरणः — कलकत्ता उच्च-न्यायालये
श्री. निर्मलचन्द्र दासगुप्तामहोदयैः चालितः अभियोगः।

अस्माकं राज्यकर्तृणाम् उपरि सुविचारितायाः वादविवादस्य च
कोऽपि परिणामः न भवति इति अस्माभिः दशवारं अनुभूतम्। संस्कृत-
पण्डितानां उपरि अपि तस्य परिणामः न भवति इति ३–४ ऑक्टोबर
१९६६ दिनांकयोः जाते अ. भा. संस्कृत-साहित्य-सम्मेलनस्य स्वर्णजयन्ति
अधिवेशने दृष्टम्। सर्वकारस्य रोषः मा भवतु इति हेतुना पं. पट्टा-
भिराम शास्त्री, डॉ. मण्डनमिश्र, पं. वासुदेव द्विवेदी, श्री. रुद्रदेव त्रिपाठी,
पं. महेश दवे, पं. चट्टोपाध्यायः एतैः प्रकाण्ड पण्डितैरपि संस्कृत-राष्ट्रभाषा
प्रस्तावस्य विरुद्धं हस्ताः उद्ताः!! 'अर्थस्य पुरुषो दासः' इति कौरव

सभायां भीष्मद्रोणादि-ऋषिभिरपि उक्तम् । तेषां पुरतः के इमे ! अस्माकं पक्षे पं. विद्याधर शास्त्री, कपिलदेवशर्मा, डॉ. वर्णेकर, वसन्त गाडगीळ इति एव आसन् । प्रत्येकस्मिन् संस्कृत-विश्व-परिषदः अधिवेशने अपि अयमेव अनुभवः । अराजकतायाः परिणामः भवत्येव किन्तु स मार्गः संस्कृतस्य राष्ट्रभाषावादिनां अस्मद् सदृक्षाणां कृते निषिद्धः । स मार्गः तदा एव यशस्वी भवति यदा तत् पृष्ठे-पाशवि मताधिक्यं (ब्रूट मेजॉरिटि) भवति अथवा हननसिद्धता भवति । यद्यपि अस्माकं पक्षः न्याय्यः कल्याणकारकः तथापि वयं अल्प-संख्यांकाः । यदि अनन्यगतिकत्वेन अस्माभिः अपि स एव मार्गः अवलंबनीयः इति चिन्तितं तथापि वयं न यशस्विनः भवेम । सर्वकारोपरि, सत्ताधीशानाम् उपरि कदाचित् स्वल्पः अंकुशः चलेत् तर्हि स न्यायालयस्य एव इति मत्वा अस्माभिः प्रयतितम् किन्तु तदर्थं बहु धनम् आवश्यकम् । तत् न अस्माकं सविधे । अयं विचारः मया डॉ. सुनीतिकुमार-चट्टोपाध्यायानां, डॉ. सेन गुप्तानां, श्री. निर्मलचन्द्र दासगुप्ता महोदयानां च पुरतः ६।३।६८ दिनांके लिखिते पत्रे स्थापितः । स विचारः एतावत्-तीव्रतया श्री.दासगुप्तमहोदयैः आत्मसात् कृतः यत् तैः उच्चन्यायालये अभियोगः प्रावेशितः, स्वयमेव महान् विधिज्ञः इति-कारणात् । मातृभाषा, हिन्दी, आङ्ग्ली इति प्रचलित-त्रिभाषासूत्रस्य तथा च लोकसभायां १६।१२।६७ दिनाङ्के पारितस्य प्रस्तावस्य निस्सा-रणार्थं केन्द्रीय तथा च बंगाल-सर्वकारस्य गृह (तथा च) शिक्षा-मन्त्रिणां विरोधी अयं अभियोगः, मार्च-मासे श्रवणार्थं न्यायालये आगच्छेत् । अस्माभिः सर्वैः परमेशः प्रार्थनीयः 'श्री. दासगुप्तामहोदयेभ्यः अस्मिन् अभियोगे यशः देहि' इति ।

१७ अन्यः न्याय्यः मार्गः

"हिन्दीमातृभाषिकैः सत्यम् अनुसृत्य स्वकर्तव्य-पालनं करणीयम्"

अहं सम्यग् जानामि यत् अत्र सम्मिलितानां अधिकांश-जनानां मातृभाषा हिन्दी अस्ति इति । भवतां सर्वेषां चरणकमलेषु निपत्य अत्यन्तं लीनतया मया प्रार्थना क्रियते यत् मम अग्रिमं विधानम् अतीव शान्तचेतसा श्रोतव्यम् इति । श्रुतमात्रं हि केचिज्जनाः क्रोधस्य अपि वशंवदाः भविष्यन्ति । किन्तु तथा मा भवतु । सुविचारतया, न्यायैक-बुद्ध्या च कोपस्य नियंत्रणं कुर्वन्तु । मया मम "संस्कृतस्य प्रगतिपथे कस्तिष्ठति ? कः तत्र उपायः ?" इति लेखे अतीव स्पष्टतया विवरणपूर्वकं दर्शितमस्ति, सिद्धीकृतमस्ति यत् संस्कृतस्य परिपन्थिनी अस्ति न आङ्ग्ली भाषा अपि तु

केन्द्र-शासन-भाषा-स्थाने स्थापिता हिन्दी भाषा। अस्य लेखस्य प्रतयः ये वाञ्छन्ति तेभ्यः दास्यामि। कुत्रापि मम कथनं न सत्यम् इति ते मंस्यन्ते तर्हि तत् मत्प्रति प्रदर्शयन्तु। "सर्वेभ्यः समानो अवसरः मिलेत्" इति संविधानस्य आश्वासनम्। तत् न पूर्यते हिन्दी भाषायाः कें. शा. भाषापदे स्थापनेन उत संस्कृतेन पूर्यते। यः सन्मानः, यद् धनम्, यः समाजे लौकिकः हिन्दी-आङ्ग्ली-भाषा-द्वयस्य अथवा, हिन्दी-संस्कृतम्-आङ्ग्लीभाषा-त्रयस्य अभ्यसनेन हिन्दी मातृभाषिकैः प्राप्यन्ते तावन्तम् अेव सन्मानं तावद् अेव धनम्, लौकिकं च प्रापयितुं हिन्दीतर-मातृभाषिकैः भाषा-त्रयं, चतुष्कं, वा-नाम एका अधिका भाषा-पठनीया भवति। अयं घोरः अन्यायः। तस्य परिणामः कथं राज्य-प्रादेशिक-भाषाणां आग्रहे भवति, अन्ते राष्ट्रस्य विघटने भवति, तत् पूर्वम विवर्णितम् अस्ति एव। राष्ट्रस्य ऐक्यं, भावनात्मकम् ऐक्यम् नॅशनल् इण्टिग्रेशन्' इति शब्दानां जपम् अस्माकं नेतारः सर्वकारीय-अधिकारिणश्च कुर्वन्ति किन्तु तेषां कृतिस्तु विघटनात्मिका। स्वार्थमूलाः प्रान्तीयता-दोषभाजाः हिन्दी-मातृभाषिकाः एव। देशस्य-राष्ट्रस्य च उद्धारः तेषां हस्ते एव विद्यते। तैरेव वक्तव्यं सर्वकारेभ्यः "हिन्दी सत्यतः प्रादेशिकी-भाषा एव यतः सा केवलं प्रतिशतम् ३३ जनानामेव मातृभाषा। अतः सा केन्द्रशासन-भाषा मा अस्तु। संस्कृत-भाषा एव यथार्थतः राष्ट्रभाषा। राष्ट्रभाषा एव स्वतंत्रे राष्ट्रे केन्द्रशासन-भाषा भवितुम् अर्हति। अतः संस्कृत-भाषा एव केन्द्रशासन-भाषा करणीया"। माध्यमिकशालासु तथा विद्यापीठेषु त्रिभाषा-सूत्रं एवं भवतु-संस्कृत-भाषा राष्ट्रभाषा-कारणात् प्रथम स्थाने भवतु; हिन्दी तथा अन्याः राज्यभाषाः तत्-तत् राज्ये द्वितीये स्थाने; आङ्ग्ली अथवा कापि अन्या परराष्ट्रीयाभाषा-तृतीया भाषा भवतु। अनेन मार्गेण एव सर्वेभ्यः समानः अवसरः मिलिष्यति। राष्ट्रै-कात्म्यं स्थास्यति; दृढीभविष्यति। हिन्दी मातृभाषिकाणां स्वार्थ-बुद्धि-विनाशाय अहं भवतः भगवन्तं च प्रार्थये।

१८ सत्यतः-राष्ट्रीयेण, जनसंघ-पक्षेण १९६५ तमे वर्षे संस्कृतस्य राष्ट्रभाषात्वम् स्वीकृतम् अस्ति।

षट्पंचाशत्तमे वर्षे मया जनसंघस्य सदस्यत्वं स्वीकृतम्। तदा तस्य पक्षस्य भाषानीतौ हिन्दीभाषा राष्ट्रभाषात्वेन स्वीकृता आसीत्। जनसंघस्य जिल्हा-परिषत्सु, विविध-सम्मेलनेषु वार्षिक-अधिवेशनेषु अपि 'संस्कृतमेव राष्ट्रभाषा इति पक्षे वादविवादः करणीयः, संगोष्ठीः

करणीया: विषय-नियामक-समितौ पुन:पुन: पराभूतोपि तथा प्रस्तोतव्यं इति मे परिपाठी आसीत्। केनापि राजकीय-शत्रुणा हता: परम-श्रद्धेया: दीनदयाळजी उपाध्याया: चतुष्षष्टि-वर्षस्य सप्टेम्बर पंचविंशति दिनाङ्के मुम्बापुरीम् आगता: व्याख्यानार्थम् । तदा प्रात:काले तैस्साकं मया बहु-विवाद: कृत: । यद्यपि मम मतं तै: न अङ्गीकृतं तथापि तेषां विरोध: बहु-क्षीण: जात: । सायंकाले व्याख्याने यदा तै: स्पष्टतया उक्तं यत् अस्माकं राष्ट्रभाषा संस्कृतम्, हिन्दी तु केन्द्र-शासन-भाषा एव, अन्या: अष्टम-परिशिष्टीया: भाषा: केवलं राष्ट्रस्य महत्त्वपूर्णा: भाषा: इति, तदा अहं, मम पक्षिण: अन्ये च पं. कवीश्वर प्रभृतय:, सानन्दं चकिता: अभवन् ।

चतुर्मासानन्तरं विजयवाडा इत्यत्र वार्षिकम् अधिवेशनम् आसीत् । नियोजिता: अध्यक्षा: श्री. वत्सराजजी व्यास महोदया: श्री. रामभाऊ गोड-बोले महोदयै: साकं नागपुरात् विजयवाडा इत्यत्र येन रेलयानेन गता:, तेनैव अहमपि गत: । मार्गे तेषां पुरत: मम पक्ष: प्रभावि-रीत्या स्थापित: । अन्ते अधिवेशने संस्कृतमेव राष्ट्रभाषा, हिन्दी तु केन्द्रशासनभाषा इति प्रस्ताव: ऐकमत्येन पारित: । सार्वत्रिक-निर्वाचनात्परं श्री. जगन्नाथराव जोशी महोदया: लोकसभा-सदस्या: अभवन् । त्रिचत्वारिंशत्-उत्तर-त्रिशततमे संविधान-परिच्छेदे परिवर्तनम् कारयित्वा संस्कृतस्य 'राष्ट्रभाषा' इति निर्देश: करणीय: इति हेतुना मया तेभ्य: एकं विधेयकं लिखित्वा प्रेषितम् । तै: तत् स्थापनार्थम् अंगीकृतम् अपि,किन्तु पक्ष-प्रमुखै: वाजपेयी-महोदयै: अनुमति: न दत्ता इति कृत्वा जोशी महोदयै: अग्रे किमपि न कृतम् ! अस्माभि: एकेन प्रस्तावेन तद् विधेयकम् लोकसभायां प्रस्थाप-नीयम् एव इति विज्ञप्ति: श्री. अटल-वाजपेयी महोदयेभ्य: करणीया ।

१९ भाषा-वैविध्यं न गौरवास्पदम् ।

मातृभाषायै प्राधान्यं देयं चेत्, भारते ७२३ भाषा: विद्यन्ते ! अेतेभ्य: सर्वेभ्य: राज्यानि देयानि स्यु: ! ! त्रयोदश प्रमुखा: प्रादेशिक्य: भाषा: विद्यन्ते इति ऐतिहासिकं सत्यं स्वीकरणीयं भवति । सपादसप्तशतानां मातृभाषाणाम् त्रयोदश भाषासु विलीनीकरणं भविष्यति चेत् तर्हि तद् अभिनन्दनीयम् । बिहारी, राजस्थानी, आदीनाम् उपभाषाणां खडीबोली हिन्दी भाषया साकं य: सम्बन्ध: विद्यते स एव सम्बन्ध: प्रमुख-त्रयोदश-भारतीय-भाषाणां संस्कृत-भाषया सह अस्ति । अत: ता: संस्कृतभाषायां यथा विलीना: भविष्यन्ति तथा एव तासां प्रगति: भवतु । सर्वासामपि

भाषाणां बहुसंख्य-शब्दाः संस्कृतात् एव विभिन्नमार्गैः विकृताः भूत्वा निः-
सृताः। उदाहरणार्थं, 'मृत्तिका' इति संस्कृत शब्दः हिन्द्यां 'मिट्टी' अभूत्,
मराठ्यां 'माती' अभूत्, तमीळभाषायां 'मण्णु' अभूत्। 'श्रेष्ठी' शेठ,
शेटजी, शेट्टी, चेट्टी अभूत्-गुजराती, मराठी, तमीळ, मलयालम् भाषासु।
सर्वाभिः भाषाभिः यदि विकृतशब्दं परित्यज्य मूलः शब्दः उपयोजितो
भवेत् तर्हि सार्वदेशिका संस्कृतम् इति एका एव भाषा प्रस्थापिता भवेत्।
नूतनाः शब्दाः ये निर्मातव्याः ते सर्वे संस्कृतात् एव गृहीतव्याः सर्वाभिरपि
भाषाभिः । प्रत्येकया भाषया स्वैरं न आचरितव्यम्। ऐकभाषिकत्वं
भारतेऽपि आगच्छेत्। तदेव इष्टम् राष्ट्रीय-एकात्मताकृते।

२० काऽपि भाषा न कठिना न वा सुलभा।

भाषाशास्त्रस्य मूलभूतः सिद्धान्तो अस्ति यत् 'मातृभाषां कोपि
बालः यया पद्धत्या आत्मसात् करोति तया एव पद्धत्या (नाम संभाषण
पद्धत्या) का अपि भाषा अधीता चेत् तर्हि सा भाषा न कठिना न
विशेषेण सुलभा वा।' अतः संस्कृतस्य काठिन्य-भय-निरासार्थम् सा भाषा
संभाषण-पद्धत्या आबाल्यादेव पाठनीया बालकेभ्यः यथा कॉन्व्हेण्ट स्कूल
इत्यत्र आङ्ग्ली भाषा पाठिता भवति। प्रयोगरूपेण अस्माभिः मुम्बई-
नगरे 'श्रीवत्स बालमन्दिरम्, इति संस्कृत-माध्यमेन एव एका माण्टेसरी
शाला संचालिता अस्ति। अनया रीत्या एव पं. कपिलदेव शर्मा महोदयैः
स्वीये आयुषि स्वीयं सर्वमेव कुटुम्बं संस्कृत-मातृभाषि कृतम् अस्ति। तत्र
बाला वृद्धाः, :पुरुषाः स्त्रियः, सेवकाश्चः, तेषां गृहे नूतनतया आगताः स्नुषाः
अपि, सम्पूर्णतया संस्कृतेन एव व्यवहरन्ति। यदि कोपि शङ्कते तर्हि तेन
टिळक कोठी, लोकमान्यनगरं छपरा, बीहार राज्यम् इत्यत्र गत्वा प्रत्यक्षं
द्रष्टव्यम्। यदि कपिलदेवशर्मावत् प्रयतिष्यति तर्हि प्रत्येकः संस्कृत-
शास्त्री-पण्डितः स्वीयं कुटुम्बं संस्कृत-मातृभाषि कर्तुं शक्ष्यति। अत्र
आगतेभ्यः पण्डितेभ्यः मम इयं साग्रहा प्रार्थना। इतोऽपि ऊर्ध्वं यद्
व्याकरण-काठिन्यं विद्यते तत् कथं दूरी-कर्तव्यम्, पाणिनेय-व्याकरणे बाधां
न कृत्वा एव, तत् 'कीदृशम् संस्कृतम् ?' इति पुस्तके अस्माकं पं. श्याम-
कुमार आचार्यैः विवर्णितम् अस्ति एव।

२१ संस्कृत-व्यवहार-भाषा-कारिणी सभा।

यदि नग्नं सत्यं कथनीयम् तर्हि प्रतिपादयामि यत् संस्कृत-
पण्डितैः तथा च संस्कृत-अध्यापकैः प्राध्यापकैः अपि, यद्यपि तेषां जीवि
काऽपि संस्कृतोपरि विद्यते, तैः स्वयम् संकृतस्य उद्धारार्थम् किमपि न

कृतम्, किमपि न क्रियते च। संस्कृत पण्डिता:,अध्यापका:, प्राध्यापकाश्च-अपि, यदा ते मिलन्ति तदा संस्कृत-भाषायां न भाषन्ते अपि तु प्रादेशिक-भाषायाम् एव । तैः दैनंदिन व्यवहारे संस्कृतम् प्रयोक्तव्यम् । स्वीयाम् पञ्च-क्रोश्याम् विद्यार्थिषु 'संस्कृत-व्यवहार - भाषा - कारिणी - सभा-' स्थापनीया । एतदर्थं सर्वकारः प्रभूतं धनं दास्यति ।

२२ त्रिभाषासूत्रम् एवं भवतु ।

अन्ते अहम् डॉ. व्ही. के. आर्. व्ही. राव महोदयेभ्यः, केन्द्र सर्व-कारेभ्यः, राज्य-सर्वकारेभ्यः च विज्ञापयामि यत् तैः केनापि प्रकारेण न्यूनात् न्यूनं शालासु पञ्चमकक्षातः आरभ्य शालान्त-परीक्षा-पर्यन्तम् संस्कृत-विषयः अपरिहार्यः करणीयः । विद्यमान-परिस्थितौ अपि, बहु विचलनम् अकृत्वा अेव त्रिभाषासूत्रम् एवं कर्तुम् शक्यम् ।

१) प्रादेशिक-भाषा

२) संस्कृतम्

३) हिन्दी अथवा आङ्ग्ली अथवा कापि एका परराष्ट्रीया भाषा विद्यार्थिनः इच्छानुसारेण ।

हिन्दी-मातृभाषिकाणां कृते अधुना काऽपि एका दाक्षिणात्या भाषा अध्येतव्या इति यः आदेशः अस्ति स सर्वथा अर्थहीनः। तेषां कृते त्रिभाषा-सूत्रम् एवं भवतु

१) हिन्दी (मातृभाषा कारणात्)

२) संस्कृतम्

३) आङ्ग्ली अथवा अन्या काऽपि परराष्ट्रीया भाषा ।

२३ चलच्चित्रपट (सिनेमा) निर्मातृभ्यः विज्ञप्तिः 'संस्कृत-सिनेमा निर्मातव्यः' ।

का अपि भाषा भवतु, तस्याः प्रसारार्थं "सिनेमा" इति एकम् अतीव प्रभावि-साधनम् । हिन्दीभाषायाः प्रसारः अधिकांशेन हिन्दी-चित्र-पट-प्रदर्शनेन एव जातः अस्ति । संस्कृतस्य भारते सर्वत्र प्रचारार्थं एकः सुन्दरः संस्कृत-चित्रपटः निर्मातव्यः इति मम आचार्य अत्रे, व्ही. शांताराम, सत्यजित् सेन, राजकपूर, आदिभ्यः प्रथितयश-चित्रपट-निर्मातृभ्यः साग्रहं विज्ञप्तिः । भाषा तु अत्यन्ता सुलभा भवतु, विषयः तु नूतनः एव भवतु एतदर्थं 'शाकुन्तलम्', 'मृच्छकटिकम्' नैव गृहीतव्यानि । केन्द्रसर्वकारस्य

'बोधनं तथा आकाशवाणी' मन्त्रालयः प्रमुखवार्ता-वितरणं चित्रपटद्वारा करोति। भाषाः तु विविधाः भवन्ति। के अपि वार्ता-चित्रपटाः संस्कृत-भाषायाम् अपि भवन्तु। इमे चित्रपटाः भारते सर्वत्र प्रदर्शिताः भवन्तु। पटकथा-लेखकास्तुः आधुनिकाः भवन्तु न पुराणजडसंस्कृत-शास्त्रिणः। श्री. सत्यनारायण सिंहमहोदयाः नूतन नभोवाणी मन्त्रिणः इमां प्रार्थनां अवश्यं शृण्वन्तु। अयं संस्कृत-सिनेमा-निर्माण-परिश्रमः धननाश-कारकः भवेद् इति न भेतव्यम्। प्रथम-प्रयत्नस्तु अवश्यं लाभदायको भवेत्, केवलं तस्य नूतनत्वात्।

२४ नभोवाणी-उपरि प्रतिदिनं संस्कृतभाषायां वार्तावितरणं भवतु। संस्कृत-पाठाः संस्कृतमाध्यमेन भवन्तु।

अधुना प्रादेशिकभाषा, हिन्दी, आङ्ग्ली इति त्रिषु भाषासु नभो-वाणी उपरि प्रतिदिनं त्रिचतुर्वारं वार्ता-वितरणं भवति। ताः एव-वार्ताः प्रतिदिनं न्यूनात् न्यूनं द्विवारं संस्कृतभाषायाम् अपि वितरिताः भवन्तु। अन्यासु भाषासु वितरिताः वार्ताः विद्यन्ते एव अतः बोधनम् अवश्यं सुकरं भवेत्।

अधुना प्रतिसप्ताहं द्विवारं संस्कृत पाठाः वितरिताः भवन्ति किन्तु माध्यमम् अस्ति काऽपि प्रादेशिका भाषा। तत् न समीचीनम्। संस्कृतमेव माध्यमं भवतु यावत् शक्यम्।

२५ उपसंहारः।

यद् यद् कथनीयम् आसीत् मे मनसि तत् तत् संक्षेपेण मया उक्तम् अस्ति। तस्मात् यद् उचितं तत् ग्राह्यम् इति संप्रार्थ्य ऊनाधिक-शब्दार्थं क्षमां याचे।

* * *

शा र दा—गौ र व — ग्र न्थ मा ला

पुष्पम्	लेखकः	मूल्यम्
१. श्रीराजेन्द्रप्रसादचरितम्	पं.वासुदेवशास्त्री लाटकर	३.००
२. वात्सल्यरसायनम्	प्रा. श्री. भा. वर्णेकर	१.००
३. शिक्षैषा सात्त्विकी सताम्	प्रा. रं. रा. देशपाण्डे	२.००
४. श्रीरामकृष्णपरमहंसीयम्	प्रा. श्री. भा. वर्णेकर	१.२५
५. बालकानां जवाहरः	पं. विघ्नहरि देव	०.४०
६. श्रीमान् विन्स्टनः चर्चिलः	पं. औदुम्बरकर शास्त्री	०.६४
७. अप्पाशास्त्रीः साहित्यसमीक्षा	प्रा. अशोक अकलूजकर	२.००
८. श्रीशिवराज्योदयम् खण्डः १	डॉ. श्री. भा. वर्णेकर	८.००
९. 'समानमस्तु वो मनः'	डॉ. ग. बा. पळसुले	३.००
१०. मराठी—संस्कृत-शब्दकोषः	जोशी-परांजपे-गाडगीळ (क्रमशः)	
११. भूपो भिषक्त्वं गतः ।	पं. ग. पां. लोण्ढेशास्त्री	१.००
१२. विनायक-वीर-गाथा	डॉ. ग. बा. पळसुले	३.००
१३. आङ्ग्ललघुकाव्यानुवादमाला	पं. ल. ज. खरे	२.००
१४. श्रीराजयोगभाष्यम्	डॉ. चि. त्र्यं. केङ्घे	५.००
१५. मुक्तक-मञ्जूषा	दि. द. बहुलीकर	२.००
१६. ललित-गीता-लहरी	पं. ओगेटि परीक्षित्शर्मा	१.५०
१७. श्रीसिद्ध-रामनाथ-कथा	योगी नरहरिनाथः	३.००
१८. जैत्र यात्रा विलाससारः	श्रीभाष्यस्वामी	१.००

प त्र व्य व हा र स्था न म्

'शारदा' – कार्यालयः पुण्यपत्तनम् २

संपादक मुद्रकः प्रकाशकः स्वामी – बसन्त अनन्त गाडगीळ
मुद्रणस्थलम्– यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २.
प्रकाशनस्थलम्-१.- म.म. प्रा.द.वा.पोतदार,४९८ शनिवार,पुण्यपत्तनम् २
२.—श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४
कार्यालयः— खजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् २.

॥ श्रीगजाननः प्रसन्नः ॥

गीर्वाण - वाग् - वर्धिनी - सभा

पु ण्य प त्त न म्

॥ द्वादश - वर्षात्मकः वृत्तान्तः ॥

[आषाढ शके १८७८ तः ज्येष्ठ १८८९]

संपादकाः प्रकाशकाश्च

पं. कवीश्वर दत्तात्रेयशास्त्री (अध्यक्षः)
काव्यतीर्थ शेण्डचे लक्ष्मणशास्त्री (कार्यवाहः)
काव्यतीर्थः दीक्षित नारायणशास्त्री (कार्यवाहः)

संस्थापकाः

कै पं. रानडे पुरुषोत्तमशास्त्रिणः
कै. पं. वाडीकर नारायणशास्त्रिणः
व्याकरण कोविद् शेण्डचे गणेशशास्त्रिणः

गीर्वाणवाग्वर्धिनीसभा

कार्यकारिमण्डलम्

अध्यक्षः

पं. कवीश्वर दत्तात्रेयशास्त्रिणः

उपाध्यक्षः

श्री. प. मो. सहस्त्रबुद्धे

कार्यवाहौ

काव्यतीर्थः शेण्डये लक्ष्मणशास्त्री
पण्डित दीक्षित नारायणशास्त्री

साहाय्यकः कार्यवाहः

शेण्डये गणेशशास्त्री

सभासदौ

प्रा. आठवले अनन्तशास्त्रिणः
पं. रा. मो, धर्माधिकारिणः

गीर्वाण-वाग्-वर्धिनी सभा शके १८७८=१८८९

॥ श्रीगजाननः प्रसन्नः॥

अयि श्रेष्ठाः प्रियवाचकाः गीर्वाणभाषा-बद्धादराः गीर्वाण-वाग्-वर्धिन्यां सभायां कृतभूरिप्रेमाणः प्रणतिततिपूर्वं निवेद्यते यत्

गीर्वाण-वाग्-वर्धिन्याः सभायाः त्रयोविंशः वार्षिकः वृत्तान्तः अस्माभिः मुद्रितः। तत आरभ्य एतावत् कालपर्यंन्तं षट्त्रिंशद् वर्षाणि आषाढे सुदि चतुर्थ्यां भानुवासरे १८९० तमे शाके पूर्णान्यभवन् गीर्वाण-वाग्-वर्धिन्याः सभायाः। एतावति काले कुतो न मुद्रितः वृत्तान्तः इति प्रश्नः समुदेति। परंतु तस्योत्तरं तु एवं-सभायाः अयं नियमः विशेषतो द्रव्य-याचना न विधेया। स्वयमेव यः द्रव्यम् अर्पयति तद् गृहीत्वा तेनैव सभा-कार्यं तावता द्रव्येण यथा स्यात् तथा करणीयम्। तेन च एको महान् लाभः संवृत्तः। अकलहम् इयं सभा षट्त्रिंश वर्षाणि सुखं प्रचलति। अविरतं कार्यं करोति। इदानीम् अस्याः सभायाः स्थापन-विषये किंचिदिव वृत्तं लिखामि यतः संस्थापकानां मध्ये अहमेव एकः उर्वरितोऽस्मि। षट्-त्रिंशद् वर्षेभ्यः प्राक् श्रीमद् जगद्गुरु श्रीचरणानां शंकराचार्याणां (शिरोळकरस्वामिनाम्) अत्र चतुरो मासान् निवासः आसीत्। तदानीं संस्कृतभाषया प्रवचनं कर्तव्यमिति निमंत्रण समागतम्। तत् कै. पं. रानडे शास्त्रिभिः स्वीकृतम्। मां प्रति अब्रुवन् संस्कृतभाषया प्रवचनार्थम् आचार्यैः आहूतं वर्तते अहं च तन्निमन्त्रणं स्वीकृतवान्। परंतु कथम् एतत् शक्तं भवेत् इति मया भीः प्रदर्शिता। तथापि निमन्त्रणं स्वीकृत्य गत्वा प्रवचनं कृतम्। अनन्तर अपरस्मिन् दिने पं. रानडे पुरुषोत्तशास्त्रिणः आगत्य अब्रुवन् "अयि गणेशशास्त्रिन्! अस्माभिः एका गीर्वाण-वाग्-वर्धिनी नाम्नी सभा स्थापनीया येन वयं संस्कृतं वक्तुं प्रभवामः। तस्मिन्नेव वर्षे पण्डित-प्रवराणां राजेश्वरशास्त्रिणां व्याख्यानं गीर्वाणभाषया समभूत्। तदुद्दिश्य ते अवोचन् यत् बहिर्भवाजनाः अत्र आगत्य संस्कृतं आश्रित्य ब्रुवते वयं तु केवलं श्रोतारः। नैतत् रुचिरम्। तत् श्रुत्वा तद् अङ्गीकृत्य न्यवेदयं यत् यदि एतादृशो निश्चयः स्यात् यावत् वयं स्मः तावत् कालपर्यन्तं सर्वाणि कार्याणि दूरीकृत्य सभा चालनीया। अन्यथा पुण्यपत्तने प्रतिदिनं द्वित्राः सभाः उत्पद्यन्ते ततोऽप्यधिका अपि नश्यन्ति। तादृक् माभूत् एतदर्थम् अङ्गी-कृतं व्रतमिव सभां संरक्ष्य व्याख्येयम्। एकान्तरिते भानौ एको वक्ता एकः अध्यक्षः एकः श्रोता एवंत्वेऽपि व्याख्यानं वर्तते एव। तत् तैः स्वीकृतम्। ततः तदानीं कै. नारायणशास्त्रिणः वाडीकराः अत्र आसन्। तान् आहूय एतत् सर्वं निवेदितम् तैरपि तत् स्वीकृतम्। ततः पुण्यपत्तनस्थानां संस्कृत-

ज्ञानां संस्कृतप्रेमिणांच एका नामावलि: लिखिता । तस्मिन् समये अहं जीर्णज्वरेण रुग्ण: आसम् । तेन च निमन्त्रणं कर्तुं अहम् अप्रभु: । अपरं च तदानीं मत्सविधे 'सायकल'–संज्ञकं यानमपि नासीत् । अत: तत् निमन्त्रण-कार्यं पं. रानडेशास्त्रिण: एव अकुर्वन् । तस्मिन् समये आनंदाश्रमे संचालका: आसन् आपटे दत्तोपन्ता: । ते प्रश्नक्षणे एव आनंदाश्रमे सभार्थं स्थानं अयच्छन् । अनन्तरं विदुषां सभा संभूता । तत्र च कै. वैद्य नानल पुरुषोत्तम-शास्त्रिण: आसन् । ते अब्रुवन् अस्माभि: पूर्वम् एतादृशी एका सभा संचालिता आसीत् । परंतु कार्यकर्तृणाम् अभावात् सा विरता अभवत् । अत: तन्नाम्ना एव इयं सभा इति प्रचालितव्या । तत् सर्वै: स्वीकृतम् । वैद्य-नानल शास्त्रि-प्रचलितायां सभायाम् अहमपि 'विषूचिका ।' विषयं स्वीकृत्य व्याख्यातवान् । अध्यक्षा: आसन् कै. वैद्य मामा शेंडाणीकरा: । अस्यां सभायां सभासदशुल्कं किमपि नास्ति । यावन्तो जना: श्रोतुं समायान्ति ते सर्वेऽपि सभासद: । तन्मध्यादेव कार्यकारिमण्डलं विविच्यते । ये केचन द्रव्यं ददति तद् गृहीत्वा प्राप्त्यनुरूपं व्ययो विधेय: इति पद्धति: । प्रथमं सभाया: अध्यक्षा: पं. रानडे पुरुषोत्तम शास्त्रिण: आसन् । यदा ते गोवा-प्रान्तं गता: तदानीं आनन्दा श्रमे वर्तमाना: प्रधानशास्त्रिण: पं. शंकरशास्त्रिण: मारुलकरा: सभाया: अध्यक्षा अभवन् । ते यदा शरीरस्य अस्वास्थ्यात् कोल्हापुरं प्रस्थिता: तदारभ्य इदानीं पं. कवीश्वर दत्तात्रेयशास्त्रिण: अध्यक्षा: वर्तन्ते । प्रथमकार्यवाहा: पं. किंजवडेकर रामचन्द्र शास्त्रिण: आसन् । द्वित्रिवर्षै: तै: तत् स्थानं मुक्तम् । तदारभ्य अहम् अद्यावधि कार्यवाहोऽस्मि । बहुवर्षंयावत् वैद्य आपटे त्र्यम्बकराया:, वैद्य देशपाण्डे पाण्डुरंगशास्त्रिण: इति त्रयो व कार्यवाहा: भवन्ति स्म । गच्छता कालेन पं. बाडीकर नारायणशास्त्रिण: अहमदाबादनगरं गता: सेवानिमित्तेन । तथापि प्रतिवर्षम् अत्र आगत्य एकवारं व्याख्यान्ति स्म सभायाम् । डॉ. के. ना. वाटवे बहुवर्षं यावत् उपाध्यक्षपदे आसन् । इयं सभा महाराष्ट्र-द्वितीय-संस्कृत-साहित्य संमेलनम् अकरोत् । बेळगांवग्रामे प्रथमं साहित्य-संमेलनं संभूतम् । केनचित् कारणेन कै. न. चिं. (तात्यासाहेब) केळकर महोदया: 'बेळगांव' ग्रामं गता: संमेलन-सभायां उपस्थिता आसन् । संमेलन समाप्ति–समये तत्रस्था: चालका अग्रिमं संमेलनं कुत्र कर्तव्यम् इत्यासन् विचारमग्ना: । तदानीं पं. बुर्लीशास्त्रिण: महता घोषेण अब्रुवन् "साहित्यसम्राट् तात्याराया: पुण्यपत्तनत: अत्र समागता: वर्तन्ते । ते एव द्वितीयं संमेलनं पुण्यपत्तने करिष्यन्ति । तत्र चिन्तावकाश: क: ? तत् श्रुत्वा सपदि अहं करिष्यामि अग्रिमं संमेलनं इत्युक्त्वा तात्याराया: न्यमन्त्रयन् पुण्यपत्तने द्वितीयं साहित्यसंमेलनम् । पुण्यपत्तनं आगत्य गीर्वाण-वाग्-वर्धिन्यां तेषां

एकं पत्रं समागतम् । बेळगांवग्रामे जाते प्रथमे संस्कृत संमेलने द्वितीय-संस्कृत-साहित्य-संमेलनस्य निमन्त्रणम् अहं पुण्यपत्तनार्थं दत्तवान् । संस्कृत-विषयकम् एतत् क्षेत्रं भवत्सभायाः वर्तते । अतः गीर्वाणवाग्वर्धिनीतः एव एतत् संमेलनं भवन्तः कुर्वन्तु । अहं सर्वात्मना साहाय्यं करिष्यामि । ततः संमेलनार्थं बहुवारम् आनन्दाश्रमे सभाः संवृत्ताः । तात्यारायाः पत्रप्रेषणेनैव द्रव्यं संचितवन्तः । पुण्यपत्तनस्थैः विद्याप्रेमिभिः भिन्नाभिः भिन्नाभिः संस्थाभिः बहुतर साहाय्यं दत्तम् । तत्र तात्याराय केळकराः, पं. रानडे पुरुषोत्तमशास्त्रिणः, डॉ० के. ना. वाटवे, प्रा. डॉ. रा. ना. दांडेकराः, शेण्डचे गणेश शास्त्रिणः प्रमुखकार्यकर्तारः आसन् । एतत् संमेलनं १८६३ शाके माघे वदि १४।३० इति दिनद्वयं अभूत् । श्री. कान्ताचार्य रड्डीमहोदयाः स्वयमेव लघुलघूनि रूपकाणि विरच्य अकुर्वन् बालेभ्यः । तदानीं ते अत्र शालाधिकारिणः आसन् । गायनाचार्याणां विनायकबुवा पटवर्धनानां होराद्वयं संस्कृतमयं गायनं अभूत् । संमेलनाध्यक्षाः पं. राजेश्वरशास्त्रिणः काशीस्थाः । स्थलं स. प. महाविद्यालयस्य रमाबाई सभागृहम् । अवतरण-स्थलं पण्डितानां कृते ब्राह्मण-कार्यालयः-भोजन । व्यवस्थायां आसन् भाजेकर सहस्रबुद्धे पुरुषोत्तमशर्माणः । अन्ततः सर्वेऽपि सभ्या एवमेव अब्रुवन् यत् द्वितीयम् अपि एतत् संमेलनम् अद्वितीयमेव अभूत् ।

सभायाः यदा पञ्चविंशतिर्वर्षाणि पूर्णानि तदा रजत-महोत्सवः कृतः । तदानीम् अत्र संस्कृत-सभानाम्नी एका सभा आसीत् । तत्-सभासद्भिः-पं. वसंतराय गाडगीळ, डॉ० पळसुले, राहूरकर प्रभृतिभिः बहु साहाय्यं कृतम् तदानीं शिवाजी मंदिरे बहवः कार्यक्रमाः जनमनमोदकराः अभवन् । रजतमहोत्सवं विधाय पूर्वतनाः सभाचालकाः तैः सर्वैरपिनूत्नान् कार्यकर्तॄन् प्रकल्प्य स्वयमेव विरतिः स्वीकृता । अहमेव केवलं एकः मार्गदर्शनार्थं तथा नूत्नानां यदि समयो न स्यात् तर्हि कार्यकरणार्थं कार्य-वाहत्वेन अवशिष्टोऽस्मि । तथापि सर्वं कार्यं नूत्ना जना एव कुर्वन्ति । अहं केवलं साक्षित्वेन द्रष्टा इदानींतनानां कार्यकर्तॄणां नामधेयानि प्रथमपृष्ठे एव मुद्रितानि वर्तन्ते । एता दृशं अल्पं पूर्ववृत्तान्तं विलिख्य पञ्चत्रिंशत् वर्षमध्ये ये ये वार्षिक-समारंभाध्यक्षाः अभूवन् तेषां नामधेयानि लिखामि ।

१ कै. म. म. वासुदेवशास्त्री अभ्यंकराः
२ कै. प्रा. र. दा. करमकर
३ श्रीमत् शंकराचार्याः (जेरेस्वामिनः)
४ कै. डॉ. हरदत्तशर्माणः
५ ब्रह्मीभूत प. प. केवलानंदसरस्वतीस्वामिनः

६ कै. विद्याभूषण रंगाचार्य रड्डीशास्त्रिण:
७ कै. साहित्यसम्राट् न. चिं. तात्याराय केळकरा: केसरी - संपादका:
८ डॉ. प. ल. वैद्य महाभागा:
९ कै. ज. स. तथा तात्याराय करंदीकरा: केसरी-संपादका:
१० कै. आयुर्वेदाचार्य नानल पुरुषोत्तमशास्त्रिण:
११ कै. डॉ. श्रीपाद कृष्ण बेलवलकरा:
१२ वैद्य पंचानन कवडे कृष्णशास्त्रिण:
१३ कै. रा. ब. काशिनाथ नारायण दीक्षिता:
१४ कै. पुरुषोत्तम मंगेश लाड न्यायाधीशा:
१५ कै. मारुलकर शंकरशास्त्रिण:
१६ कै. आमदार रामभाऊ मंडलीकमहोदया:
१७ पं. गलगली रामाचार्या: मधुरवाणी-संपादका:
१८ कै. आहिताग्नि धुंडिराज बापट दीक्षिता:
१९ कै. वैद्यभूषण जोशी गणेशशास्त्रिण:
२० तर्कतीर्थ जोशी लक्ष्मणशास्त्रिण:
२१ श्रीमत् जगद्गुरु शंकराचार्यचरणा: (शिरोळकरस्वामिन:)
२२ प्रा. म. म. अभ्यंकर काशिनाथशास्त्रिण:
२३ पं. हरिदत्तशास्त्रिण: आयुर्वेदप्रवरा:
२४ कै. पं. रानडे पुरुषोत्तमशास्त्रिण:
२५ कै. ज. स. करंदीकरा: केसरी-संपादका:
२६ श्रीमत् जगद्गुरु शंकराचार्यचरणा: (एरंडेस्वामिन:)
२७ म. म. चित्राव सिद्धेश्वरशास्त्रिण:
२८ डॉ. के. ना. वाटवेमहोदया:
२९ कै. न्यायरत्न वाडीकर नारायण शास्त्रिण:
३० कै. न. वि. गाडगीळ विद्युन्मन्त्रिण:
३१ मुरलीधर माधव घाणेकर शिक्षणाधिकारिण:
३२ भारताचार्य ह. भ. प. वा. शि. कोल्हटकरा:
३३ म. म. पोतदार दत्तोपंता:
३४ पं. लोंढे गणेशशास्त्रिण:
३५ पद्मभूषण हरिभाऊ पाटसकरा:

एभि: पुरुषै: तस्मिन् तस्मिन् वर्षे अध्यक्षपदं भूषयित्वा स्वे स्वे विचारा: प्रकटीकृता: । एषु मध्ये केषांचन भाषणानि पद्यमयान्यपि आसन्। तानि पद्यानि तैस्तत्र पठितानि ।

इदानीं पञ्चत्रिंशे वर्षे येषां व्याख्यानानि अभूवन् तेषां विषयं

अध्यक्षनामधेयं च लिखामि । तेन अस्यां सभायां कान् कान् विषयान् आश्रित्य व्याख्यानानि भवन्ति तस्य दिग्दर्शनं स्यात् ।

अस्याः सभायाः आरंभदिनं आषाढमासस्य प्रथमो भानुवासरः व्याख्यानदिनक्रमेण यः समागच्छति सः तेन कदाचित् प्रथमो भानुवारो भवति कदाचित् द्वितीय अपि भवति । अस्मिन् वर्षे आषाढ शुद्ध द्वितीयायां भानुवासरे वर्षारंभः समभूत् । अतः तद्दिनादारभ्य व्याख्यानानि समभूवन् ।

अध्यक्षाः	वक्तारः	विषयाः
पं. जोशी वेङ्कटेशशास्त्री	पं. भागवत् वामनशास्त्री	ग्रन्थरत्नद्वयम्
पं. गोस्वामि पांडुरंगशास्त्री	पं. पंढरपुरे गोविंद शास्त्री	गुरुपूर्णिमा
श्री. शहस्रबुद्धे दाजीरायाः	पं. गाडगीळमहोदेवशास्त्री	वेदपरिचयः
पं. परांजपेविनायकशास्त्री	अनेके वक्तारः	लोकमान्य-तिलकः
पं. कवीश्वरदत्तात्रेयशास्त्री	पं. दोराईस्वामिशास्त्री	भारतम्
पं. जोशी गणेशशास्त्री	पं. जोशी रामचंद्रशास्त्री	वेदपरिचयः
पं. परांजपेविनायकशास्त्री	पं.भागवतवामनशास्त्री	प्राध्याविद्या
श्री.सहस्रबुद्धेदाजीरायाः	शास्त्री जोशी माधवशास्त्री	सर्वेऽत्र सुखिनःसन्तु
श्री.सहस्रबुद्धेदाजीरायाः	शास्त्री शेण्डचे गणेशशास्त्री	कारागृहम्
पं. कवीश्वरदत्तात्रेयशास्त्र	पं.उद्गीरनीलकंठशास्त्री	उत्साहयोगः
पं. बोधनकर प. रे. शात्री	पं. तुंगारनारायणशास्त्री	दीपावलिः
पं. पंढरपुरेगोविंदशास्त्री	श्री. पुरंदरे गोविंद रायाः	श्रीशुकभाषितम्
निरध्यक्षम्	पं. अभ्यंकरत्र्यंबकशास्त्री	ज्योतिःशास्त्रं
पं. परांजपेविनायकशास्त्री	श्री. ना. बा. मराठे	राष्ट्रेग्रन्थालयः
पं. तुंगारनारायणशास्त्री	पं. जोशीरामचंद्रशास्त्री	गोरक्षणम्
श्री. सहस्रबुद्धे दाजीरायाः	अनेके वक्तारः	कै. काका गाडगीळ
पं. लोंढे गणेशशास्त्री	श्री. गाडगीळ वसंतरायाः	श्रीजगन्नाथपुरी
पं. शेण्डचे गणेशशास्त्री	पं. पिंगळे अनंतशास्त्री	विवाह वयोमर्याद
श्री. रा. मो. धर्माधिकारीः	पं. परांजपेविनायकशास्त्री	कै. शंकरन्
पं. जोशी रा. अ.	पं. पंढरपुरे गोविंदशास्त्री	सद्यःस्थितिः
पं. पाठक दा. प्र.	श्री. अभ्यंकर त्र्यंबकशास्त्री	वर्षभविष्यम्
श्री. सहस्रबुद्धे दाजीरायाः	जोशी माधवशास्त्री	काशीयात्रा
पं. शेण्डचे गणेशशास्त्री	पं. दा. प्र. पाठकशास्त्री	श्रीपरशुरामः
पं.गोस्वामीपांडुरंगशात्री	प्रा. भा. का. नेने	अनेकेषु एकत्वम्
.गोस्वामीपांडुरंगशास्त्री	श्री. सहस्रबुद्धे दाजीरायाः	श्रीबद्रीकेदारः

पं. शेण्डचे दत्तात्रेयशास्त्री पं. रे. बोधनकराः सत्समागमः
पं. तुंगार नारायणशास्त्री पं. जोशी जयंत वासुदेवसद्गुरुः

एवम् अस्मिन् वर्षे २७ सप्तविंशतिः व्याख्यानानि समभूवन्। तत्र वेदविषये द्वे, २वेदान्ते, धर्मशास्त्रे ५ पुराणे १ ज्योतिःशास्त्रे १ ऐतिह्ये २ प्रकीर्णविषये १५

अपराह्णे चतुर्वादनसमये व्याख्यानारम्भः सार्धपञ्चवादने समाप्तिः। निर्धारितसमये एव आरम्भो जायेत। कदाऽपि समयातिक्रमो न भवति। समाप्तौ कदाचित् कदाचित् समयातिक्रमो जायते। व्याख्यान-स्थलं बुधवारपीठे आनन्दाश्रमः। अस्मिन् वर्षे वार्षिक समारम्भः श्रीमोदीगणपतिमन्दिरे समभूत्। यतः तदानीम् आनन्दाश्रमे अपरः कार्य-क्रमः पूर्वनियोजितः आसीत्।अस्मिन् वर्षे समारम्भाध्यक्षाःआसन् पद्मभूषण हरिभाऊ पाटसकराः।ते " संस्कृतभाषायाः प्रसारार्थम् इयं सभा प्रयतते एतत्तु कौतुकास्पदं वर्तते। तथा च ३५ पञ्चत्रिंशं वर्षं यावत् अखण्डतया एतत् कार्यं प्रचलति एतत् दृष्ट्वा मम मानसं नितान्तं समपुष्यत् इत्यवोचन्। श्रीमोदी-गणपति-मंदिर-व्यवस्थापकाः दिगम्बर हरि भट महोदयाः पुष्पमालार्पणेन अध्यक्ष-सभाजनम् अकुर्वन्। अन्ते प्रसाद-वितरणं विधाय समाप्तोऽयं समारम्भः।

अस्याः साहाय्यकर्तारः

स्थानदातारः आनन्दाश्रम–चालकाः, व्याख्यान-प्रसिद्धि कुर्वाणाः वृत्तपत्रकाराः केसरी-सकाळ-प्रभृतयः, व्याख्यातारः, श्रोतारः, स्वयमेव द्रव्यदातारः। एतेषां सर्वेषाम् उपकृतिभरान् शिरसा आवहति इति निवेद्य समापयामि अमुं वृत्तान्तम्। अत्र 'लेखने यदि काचन त्रुटिः स्यात् भाषा-दृष्टया अशुद्धं स्यात् तदर्थं क्षन्तव्योऽयं जनः शेण्डये गणेशशास्त्री लेखकः इति संप्रार्थये इति शम्।

एतत् वृत्तान्तमुद्रणं पुण्यपत्तनस्थ-गुरुवारपीठस्थ-स्वाध्याय-मण्डलस्य कृपया संभूतम्। अतः तस्य उपकृतिभरान् इयं सभा शिरसा आवहति।

ॐ

श्रीशङ्करजयन्तीमहोत्सवाह्वानपत्रिका

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥
शिष्यैश्चतुर्भिराचार्यो रराज चतुरात्मभिः ।
मोदादुपनिषद्वाक्यैः तत्सेवार्थमिवागतैः ॥

भो मान्याः सनातनवैदिकमतावलम्बिनः आस्तिकवर्याः,

विदितमेवैतत्सर्वेषामस्माकं भारतीयानामास्तिकानां लोकानां यत् कलिदोषप्रभावेण अवैदिकैरप्रतिष्ठितपुरुषमतिमात्रकल्पितैः परस्परप्रतिक्षेपिभिरनेकैर्मताभासैः खिलीकृते परमाभ्युदयनिःश्रेयसनिदाने वैदिके सनातने धर्मे तत्त्वावधारणापटुबुद्धितया विमुह्य अज्ञानपङ्कनिमग्नान् लोकान्समुद्धर्तुं करुणया भगवानुमाजानिः केरलेषु कालटीक्षेत्रे मानवरूपेण श्रीशङ्करभगवत्पादनाम्ना अवतीर्य आसेतोरातुषाराद्रेर्भारतवर्षं सर्वम् अटित्वा प्रगल्भैः श्रुतियुक्त्यनुभवप्रमाणमेदुरैरप्रकम्प्यैर्वचोनिगुम्भैः पण्डितान्वैदिकसनातनमततत्त्वं प्रबोध्य, वैदिकेतराणि सर्वाण्यपि मतानि जनमानसनिलयेभ्यः समुत्सार्य प्रतिष्ठाप्य सनातनं वैदिकं मतं, सर्वकालं तत्परिपालनाय चतसृष्वपि दिशासु दिग्दन्तिन इव चतुरो मठान्निर्माय तदधिपान् चतुरः स्वशिष्यवरान् निधाय स्वीयं तेजोधाम केदारे हैमवते प्रपेद इति ।

तथा दक्षिणस्याम् आशायाम् आम्नायपीठं श्रीशृङ्गगिरिक्षेत्रे श्रीमद्भगवत्पादैः प्रतिष्ठापितं श्रीशारदापीठनाम्ना जगद्विश्रुतम् अलङ्कुर्वाणाः श्रीजगद्गुरवः श्रीमदभिनवविद्यातीर्थस्वामिपादाः प्रतिसंवत्सरं शृङ्गगिरौ श्रीशंकरभगवत्पादजयन्तीमहोत्सवं यथासंप्रदायं दिवसपञ्चकं महता वैभवेन प्रवर्तयन्ते ।

महोत्सवोऽयं सौम्यसंवत्सरेऽस्मिन् वैशाखशुक्ल-प्रतिपदम् आरभ्य पञ्चमीपर्यन्तं (१७-४-६९ तः २१-४-६९) दिवसपञ्चकं शृङ्गगिरौ प्रचलिष्यति ।

तदानीं प्रत्यहं प्रातः श्रीमद्भगवत्पादानां महान्यासपुरस्सर-रुद्राभिषेकः सहस्रनामार्चनादिपूजाविशेषाः सायं श्रीचरणानाम् आध्यक्ष्ये विदुषाम् उपन्यासाः शास्त्रार्थ-विचाराः श्रीजगद्गुरूणां धर्मोपदेशाश्च भविष्यन्ति ।

एवम् अपूर्वेऽस्मिन्नतिदुर्लभे सुकृतपुञ्जमात्रलभ्ये सर्वश्रेयःप्रदे जगन्मङ्गले महोत्सवारम्भे स्वयं सन्निधाय सर्वेऽप्यास्तिकाः श्रीगुरुचरणकमलसेवारसानुभावेन स्वात्मानं कृतार्थयन्तु इति सादरं निवेदयामः ।

श्रीशृङ्गगिरिक्षेत्रम्,
१-४-१९६९

क. पद्मनाभ उपाध्यायः
आह्वकार्यदर्शी

शारदा-(पुण्यपत्तनम् २.) १०-११ : १२ ★ रजि. क्र. एम्. एच्. ५५७
● लायसेन्स क्र. १३७ टु पोस्ट विदौट प्रीपेमेण्ट.

॥ श्रीमान् योगी छत्रपतिः शिवाजिः ॥

शिवाजिः । गोब्राह्मणप्रतिपालकः । हिंदुधर्मरक्षणकर्ता । स्वाभिमानी । महाराष्ट्रराज्यस्य संस्थापकः । शहाजि-जिजामाता-सुपुत्रः । गुरुदादाजी-कोण्डदेवस्य आदर्शः शिष्यः । साक्षात् भवानीदेव्या संरक्षितः । अतीव साहसी । पराक्रमी । कुमारवयसि मित्रैः सह तोरणकोटं स्वाधीनं कृतवान् । दूरदर्शी । बुद्धिमान् । चतुरः । आग्रानगरीगतः फलपेटिकायां उपविश्य औरङ्गजेब-बन्दिशालातः स्वात्मानं विमोचितवान् । लोकसंग्रही । सहिष्णुः । बाजी-प्रभुः, तानाजी-मालुसरे आदीनां स्वामिनिष्ठ-सेवकानां संग्राहकः । हिंदुजनतायाः स्वत्वजागृतिस्फुलिङ्गस्य प्रज्वालकः । गनिमी-युद्धनीति-विशारदः । गिरि-मूषकः । समर्थ-श्रीरामदासगुरुणा 'श्रीमान् योगी' इति प्रशंसितः । संस्कृत-भाषा उद्धारकः ।

प्रतिपच्चन्द्ररेखेव वर्धिष्णुर्विश्ववन्दिता ।
शाहसूनोः शिवस्यैषा मुद्रा भद्राय राजते ॥

डॉ. उत्पला चक्रदेव

श्रीवत्सबालमन्दिरम्
मुम्बापुरी ४

संपादकः मुद्रकः प्रकाशकः स्वामी – वसन्त अनन्त गाडगीळ
मुद्रणस्थलम्– यशवन्त मुद्रणालयः, १८३५ सदाशिव, पुण्यपत्तनम् २.
प्रकाशनस्थलम्-१.- म.म. प्रा.द.वा.पोतदार, ४९८ शनिवार, पुण्यपत्तनम् २.
२.–श्री. ल.म. चक्रदेव, ३१८ राममोहनमार्गः मुम्बापुरी ४.
कार्यालयः— वजिनामहालभवनम्, ४२५ सदाशिव, पुण्यपत्तनम् २.